10.2

॥ अथसटीकंमुंडकोपनिषद्भाष्यंप्रारभ्यते ॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰ भा॰ श्रीगणेशायनमः॥यदक्षरंपरंब्रह्मविद्यागम्यमितीरितं॥यस्मिन्ज्ञातेभवेज्ज्ञातंसर्वंतस्यासमंशयं॥१॥ब्रह्मोपनिषद्गर्भोपनिषदाद्याअथर्वण टी॰
१ वेदस्यबह्वउपनिषदःसंतितासांशारीरकेअनुपयोगित्वेनाव्याचिख्यासितत्वाद्दृश्यत्वादिगुणकोधर्मोक्तेरित्याद्यधिकरणोपयोगितयामुंडक
स्यव्याचिख्यासितस्यप्रतीकमादत्ते॥ब्रह्मादेवानामित्याद्याथर्वणोपनिषद्व्याचिख्यासितेतिशेषः॥नन्वियमुपनिषन्मन्त्ररूपामंत्राणांचेषत्वादीनां
कर्मसंबंधेनैवप्रयोजनवत्त्वमतेषांचमंत्राणांकर्मसुविनियोजकप्रमाणानुपलंभेनतत्संबंधासंभवात्निष्प्रयोजनत्वाद्व्याचिख्यासितत्वंनसंभवतीति
शंकमानस्योत्तरं॥सत्यं॥कर्मसंबंधाभावेपिब्रह्मविद्याप्रकाशनसामर्थ्यात्विद्ययासंबंधोभविष्यति॥ननुविद्यायाःपुरुषकर्तृकत्वात्तत्प्रकाश
कत्वेअस्याउपनिषदोपिपौरुषेयत्वप्रसंगात्सांसिकपुरुषदोषजत्वशंकयाऽप्रामाण्यात्व्याचिख्यासितत्वंनोपपद्यतइत्याशंक्याह॥स्याश्चेति॥वि

श्रीगणेशायनमः॥अथमुंडकोपनिषद्भाष्यप्रारंभः॥ब्रह्मादेवानामित्याद्याथर्वणिकोपनिषत्॥अस्याश्चविद्यासंप्रदायकर्तृपारंप
र्यलक्षणसंबंधमादावेवाह स्वयमेवस्तुत्यर्थम्॥एवंहिमहद्भिःपरमपुरुषार्थसाधनत्वेनगुरुणाऽयासेनलब्धाविद्येति॥श्रोतृबुद्धि
प्ररोचनायविद्यांमहीकरोति॥स्तुत्याप्ररोचितायांहिविद्यायांसादराःप्रवर्तेरन्निति॥

द्यायाःसंप्रदायप्रवर्तकाएवपुरुषाःनतुप्रणेयानिर्मा
तारःसंप्रदायकर्तृत्वमपिनाधुनातनंयेनानाश्वासःस्यात्किंत्वनादिपारंपर्यागतंततोऽनादिप्रसिद्धब्रह्मविद्याप्रकाशनसमर्थोपनिषदःपुरुषसंबंधःसं
प्रदायकर्तृत्वपारंपर्यलक्षणएवतमादावेवाहेत्यर्थः॥विद्यासंप्रदायकर्तृत्वमेवपुरुषाणांयथाविद्यायाःपुरुषसंबंधस्तथैवोपनिषदोपि॥यदिपुरुषसं
बंधोऽविवक्षितःपौरुषेयत्वपरिहारायतर्हितथाभूतसंबंधाभिधानंविनान्येनभवितव्यंस्वयमेवस्वसंबंधाभिधायकत्वेस्ववृत्तिप्रसंगादित्याशंक्याह॥स्वय रामः
मेवस्तुत्यर्थमिति॥विद्यास्तुतौतात्पर्यान्नस्ववृत्तिदोषइत्यर्थः॥स्तुतिर्वाकिमर्थंस्यतआह॥श्रोतृबुद्धीति॥प्रवर्तेरन्नितिपाठोयुक्तःवृतुधातोरात्मनेप १

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

विद्यायायत्प्रयोजनंतदेवास्याउपनिषदोपिप्रयोजनंभविष्यतीत्यभिप्रेत्यविद्यायाःप्रयोजनसंबंधमाह॥प्रयोजनेनेति॥संसारका
रणनिवृत्तिर्ब्रह्मविद्याफलंचेत् तर्ह्यपरविद्ययैवतन्निवृत्तेःसंभवान्नतदर्थंब्रह्मविद्याप्रकाशकोपनिषदारभ्या तन्नेत्याशंक्याह॥अ
त्रेति॥संसारकारणमविद्यादिदोषस्तन्निवर्तकत्वमपरविद्यायाःकर्मात्मिकायानसंभवतिअविरोधान्नहिशतशोपिप्राणायामंकुर्वतः
शुक्तिदर्शनंविनातदविद्यानिवृत्तिर्दृश्यते ततोऽपरविद्यायाःसंसारकारणनिवर्तकत्वंनास्तीतिस्वयमेवोक्त्वाब्रह्मविद्यामाहेतिसंबंधः॥
किंचपरमपुरुषार्थसाधनत्वेनब्रह्मविद्यायाःपरविद्यात्वंनिकृष्टसंसारफलत्वेनचकर्मविद्यायाअपरविद्यात्वंततःसमाख्याबलात्अप

प्रयोजनेनतुविद्यायाःसाध्यसाधनलक्षणसंबंधमुत्तरत्रवक्ष्यति॥भिद्यतेहृदयग्रंथिरित्यादिना॥अत्रचापरशब्दार्थामृग्वेदा
दिलक्षणायांविधिप्रतिषेधमात्रपरायांविद्यायांसंसारकारणाऽविद्यादिदोषनिवर्तकत्वंनास्तीतिस्वयमेवोक्त्वापरापरविद्याभे
दकरणपूर्वकमविद्यायामंतरेवर्तमानाइत्यादिना॥तथापरप्राप्तिसाधनंसर्वसाधनसाध्यविषयवैराग्यपूर्वकंगुरुप्रसादलभ्यां
ब्रह्मविद्यामाहपरीक्ष्यलोकानित्यादिना॥

रविद्यायामोक्षसाधनत्वाभावोऽवगम्यतेइत्यभिप्रेत्याह॥परापरेति॥यत्त्वाहुःकर्मजडाःकेव
लब्रह्मविद्यायाःकर्तृसंस्कारत्वेनकर्मांगत्वात्स्वातंत्र्येणपुरुषार्थसाधनत्वंनास्तीतितदनंतरश्रुत्यैवनिराकृतमित्याह॥तथापरप्राप्तिसाधनमि
ति॥ब्रह्मविद्यायाःकर्मांगत्वेकर्मणोनिंदानस्यान्नह्यंगविधानायप्रधानंविनिंद्यते॥अत्रतुसर्वसाध्यसाधननिंदयातद्विषयवैराग्याभिधानपूर्व
कंपरप्राप्तिसाधनंब्रह्मविद्यामाहातोब्रह्मविद्यायाःस्वप्रधानत्वात्तत्प्रकाशकोपनिषदांनकर्तृस्तावकत्वमित्यर्थः॥यद्युपनिषदांस्वतंत्रब्रह्मविद्या
प्रकाशकत्वंस्यात्तर्हितदध्येतृणांसर्वेषामेवकिमितिब्रह्मविद्यानस्यादित्याशंक्याह॥गुरुप्रसादलभ्यामिति ॥ १ ॥ २ ॥ ३ ॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

सं·भा· गुर्वनुग्रहादिसंस्काराभावात्सर्वेषां यद्यपि न भविष्यति तथापि विशिष्टाधिकारिणां भविष्यतीति भावः॥ ननु स्वतंत्रा चेद्ब्रह्मविद्या तर्हि प्रयोज टी·
२ न साधनं न स्यात्सुखदुःखप्राप्तिपरिहारयोः प्रवृत्तिनिवृत्तिसाध्यतावगमात्तत्राह॥ प्रयोजनं चेति॥ स्मरणमात्रेण विस्मृतसुवर्णलाभे सु
खप्राप्तिप्रसिद्धेः रज्जुतत्त्वज्ञानमात्राच्च भयकंपादिदुःखनिवृत्तिप्रसिद्धेर्न प्रवृत्तिनिवृत्तिसाध्यत्वं प्रयोजनस्यैकांतिकं अतो विश्रब्धं श्रुतिः प्र
योजनसंबंधं विद्याया असकृद्ब्रवीति तस्मात्तत्प्रकाशकोपनिषदो व्याख्येयत्वं संभवतीत्यर्थः॥ यत्त्वाहुरेकदेशिनः स्वाध्यायाध्ययनविधेरर्थाव
बोधफलस्य त्रैवर्णिकाधिकारत्वादधीतोपनिषज्जन्यब्रह्मज्ञाने स्यैव सर्वेषामधिकारस्ततः सर्वाश्रमकर्मसमुच्चितैव ब्रह्मविद्या मोक्षसाधनमिति

प्रयोजनं चाऽसकृद्ब्रवीति॥ ब्रह्म वेद ब्रह्मैव भवति॥ परामृताः परिमुच्यंति सर्वे इति च॥ ज्ञानमात्रे यद्यपि सर्वाश्रमिणामधिकारः तथा
पि संन्यासनिष्ठैव ब्रह्मविद्या मोक्षसाधनं न कर्मसहितेति भैक्ष्यचर्यां चरंतः संन्यासयोगादिति च श्रुतिवन्दर्शयति॥ विद्याकर्मविरोधाच्च ॥२॥
॥ नहि ब्रह्मात्मैकत्वदर्शनेन सह कर्म स्वप्नेऽपि संपादयितुं शक्यं॥ विद्यायाः कालविशेषाभावादनियतनिमित्तत्वात्कालसंकोचाऽनुपप

त्तेराह॥ ज्ञानमात्रइति॥ सर्वस्वत्यागात्मकसंन्यासनिष्ठैव परब्रह्मविद्या मोक्षसाधनमिति वेदो दर्शयति तादृशसंन्यासिनां च कर्मसाधनस्य स्वस्या
भावान्न कर्मसंभवः॥ आश्रमधर्मोऽपि शमदमाद्युपबृंहितविद्याभ्यासनिष्ठत्वमेव तेषां शौचाचमनादिरपि तत्त्वतो नाश्रमधर्मो लोकसंग्रहार्थत्वात्।
ज्ञानाभ्यासेनैवापावनत्वनिवृत्तेर्नहि ज्ञानेन सदृशं पवित्रमिह विद्यत इति स्मरणात् त्रिषवणस्नानविध्यादेरज्ञसंन्यासिविषयत्वादतः कर्मनि
वृत्त्यैव साहि स्वं ज्ञानस्य न कर्मणेत्यर्थः॥ इतश्च न कर्मसमुच्चिता विद्या मोक्षसाधनमित्याह॥ विद्याकर्मविरोधाच्चेति॥ अकर्तृब्रह्मैवास्मीति करोमि राम·
चेति स्फुटो व्याघात इत्यर्थः॥ यदा ब्रह्मात्मैकत्वं विस्मरति तदोत्पन्नविद्योऽपि करिष्यति ततः समुच्चयः संभाव्यत इति न वाच्यमित्याह॥ विद्याया इति॥ २
धनस्य ५

ननुगृहस्थानामंगिरःप्रभृतीनांविद्यासंप्रदायप्रवर्तकत्वदर्शनाद्गृहस्थाश्रमकर्मभिःसमुच्चयोलिंगादवगम्यतइत्याशंक्याह॥ यद्यपीति॥ लिंगस्य
न्यायोपबृंहितस्यैवगमकत्वांगीकारात्समुच्चयेचन्यायाभावात्प्रत्युतविरोधदर्शनान्नलिंगेनसमुच्चयसिद्धिः संप्रदायप्रवर्तकानांचगार्हस्थ्य
स्याभासमात्रत्वात्तत्वानुसंधानेनमुहुर्मुहुर्बाधान्मिथिलायांप्रदीप्तायांनमेकिंचनदह्यतइत्युद्गारदर्शनात्कर्माभासेननसमुच्चयःस्यात्तत्रच

यत्तुगृहस्थेषुब्रह्मविद्यासंप्रदायकर्तृत्वादिलिंगंनतत्स्थितंन्यायंबाधितुमुत्सहते॥ नहिविधिशतेनापितमःप्रकाशयोरेक
त्वसद्भावःशक्यतेकर्तुं॥ किमुतलिंगैःकेवलैरिति॥ एवमुक्तसंबंधप्रयोजनायाउपनिषदोऽल्पाक्षरंग्रंथविवरणमारभ्यते॥ यइ
मांब्रह्मविद्यामुपयंतिआत्मभावेनश्रद्धाभक्तिपुरःसराःसंतस्तेषांगर्भजन्मजरारोगाद्यनर्थपूगंनिशातयति॥ परंवाब्रह्मगमयत्य

ॐभद्रंकर्णेभिरितिशांतिः॥ ॐब्रह्मादेवानांप्रथमःसंबभूवविश्वस्यकर्ताभुवनस्यगोप्ता॥

विद्यादिसंसारकारणंचात्यंतमवसादयतिविनाशयतीतिउपनिषत् उपनिपूर्वस्यसदेरेवमर्थस्मरणात्॥ ब्रह्मापरिवृढोमहान्
धर्मज्ञानवैराग्यैश्वर्यैःसर्वानन्यानतिशेतइति॥ देवानांद्योतनवतामिंद्रादीनांप्रथमोगुणैःप्रधानःसन्प्रथमोऽग्रेवासंबभूवाभिव्य
क्तःसम्यक्स्वातंत्र्येणेत्यभिप्रायः॥ विधिर्नेदृश्यतइतिभावः॥ साधितंव्याख्येयत्वमुपसंहरति॥ एवमिति॥ ग्रंथेकथमुपनिषच्छब्दप्रयोग
इतिशंकायामुपनिषच्छब्दवाच्यविद्यार्थत्वाल्लाक्षणिकइतिदर्शयितुंविद्यायाउपनिषच्छब्दार्थत्वमाह॥ यइमामिति॥ आत्मभावेनेतिप्रेमास्पदत्वये
त्यर्थः॥ अनर्थपूगंक्लेशसमूहंनिशातयतिशिथिलीकरोति॥ अपरिपक्वज्ञानात्हित्रैजन्मभिर्मोक्षसंभवादित्यर्थः॥ ज्ञानमप्रतिघंयस्यवैराग्यंचजगत्स

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

सं॰भा॰ २ गुर्वनुग्रहादिसंस्काराभावात्सर्वेषांयद्यपिनभविष्यतितथापिविशिष्टाधिकारिणांभविष्यतीतिभावः॥ननुस्वतंत्राचेद्ब्रह्मविद्यातर्हिप्रयोज टी॰
नसाधनंनस्यात्सुखदुःखप्राप्तिपरिहारयोःप्रवृत्तिनिवृत्तिसाध्यतावगमात्तत्राह॥प्रयोजनंचेति॥स्मरणमात्रेणविस्मृतसुवर्णलाभेसु
खप्राप्तिप्रसिद्धेःरज्जुतत्त्वज्ञानमात्राच्चभयकंपादिदुःखनिवृत्तिप्रसिद्धेर्नप्रवृत्तिनिवृत्तिसाध्यत्वंप्रयोजनस्यैकांतिकंअतोविस्रब्धंश्रुतिःप्र
योजनसंबंधविद्यायाअसकृद्ब्रवीतितस्मात्तत्प्रकाशकोपनिषदोव्याख्येयत्वंसंभवतीत्यर्थः॥यद्वाद्रूरेकदेशिनःस्वाध्यायाध्ययनविधेरर्थाव
बोधफलस्यत्रैवर्णिकाधिकारत्वादधीतोपनिषज्जन्यब्रह्मज्ञानेस्त्येवसर्वेषामधिकारस्ततःसर्वाश्रमकर्मसमुच्चितैवब्रह्मविद्यामोक्षसाधनमिति

प्रयोजनंचाःसकृद्ब्रवीति॥ब्रह्मवेदब्रह्मैवभवति॥परामृताःपरिमुच्यंतिसर्वेइतिच॥ज्ञानमात्रेयद्यपिसर्वाश्रमिणामधिकारःतथा
पिसंन्यासनिष्ठैवब्रह्मविद्यामोक्षसाधनंनकर्मसहितेतिभैक्ष्यचर्यांचरंतःसंन्यासयोगादितिचब्रुवन्दर्शयति॥विद्याकर्मविरोधाच्च ३
॥नहिब्रह्मात्मैकत्वदर्शनेनसहकर्मलेशोपिसंपादयितुंशक्यं॥विद्यायाःकालविशेषाभावादनियतनिमित्तत्वात्कालसंकोचाच्चानुपप

न्नत्राह॥ज्ञानमात्रइति॥सर्वकर्मत्यागात्मकसंन्यासनिष्ठैवपरब्रह्मविद्यामोक्षसाधनमितिवेदोदर्शयतितादृशसंन्यासिनांचकर्मसाधनस्यसर्वस्या
भावान्नकर्मसंभवः॥आश्रमधर्मोपिशमदमाद्युपबृंहितविद्याभ्यासनिष्ठत्वमेवतेषांशौचाचमनादिरपितत्त्वतोनाश्रमधर्मोलोकसंग्रहार्थत्वात्।
ज्ञानाभ्यासेनैवापावनत्वनिवृत्तेर्नहिज्ञानेनसदृशंपवित्रमिहविद्यतइतिस्मरणात्त्रिषवणस्नानविध्यादेरन्यसंन्यासिविषयत्वादतःकर्मनि
वृत्त्यैवसाहित्यंज्ञानस्यनकर्मणेत्यर्थः॥इतश्चनकर्मसमुच्चिताविद्यामोक्षसाधनमित्याह॥विद्याकर्मविरोधाच्चेति॥अकर्त्ताब्रह्मैवास्मीतिकरोमि रामः
चेतिस्फुटोव्याघातइत्यर्थः॥यदात्रब्रह्मात्मैकत्वंविस्मरतिनतदोत्पन्नविद्योपिकरिष्यतिततःसमुच्चयःसंभाव्यतइतिनवाच्यमित्याह॥विद्यायाइति॥ २

धंनसं५

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

ननु गृहस्थानामंगिरःप्रभृतीनां विद्यासंप्रदायप्रवर्तकत्वदर्शनाद्गृहस्थाश्रमकर्मभिः समुच्चयो लिंगादवगम्यत इत्याशंक्याह॥ यत्त्विति॥ लिंगस्य
न्यायोपबृंहितस्यैव गमकत्वांगीकारात्समुच्चये च न्यायाभावात् प्रत्युत विरोधदर्शनान्न लिंगेन समुच्चयसिद्धिः संप्रदायप्रवर्तकानां च गार्हस्थ्य
स्याभासमात्रत्वात्तत्त्वानुसंधानेन मुहुर्मुहुर्बाधान्मिथिलायां प्रदीप्तायां न मे किंचन दह्यत इत्युद्गारदर्शनात्कर्माभासेन न समुच्चयः स्यात् तत्र च

यत्तु गृहस्थेषु ब्रह्मविद्यासंप्रदायकर्तृत्वादि लिंगं न तत्स्थितं न्यायं बाधितुमुत्सहते॥ नहि विधिशतेनापि तमःप्रकाशयोरेक
त्र सद्भावः शक्यते कर्तुं॥ किमुत लिंगैः केवलैरिति॥ एवमुक्तसंबंधप्रयोजनाया उपनिषदोऽल्पाक्षरं ग्रंथविवरणमारभ्यते॥ य इ
मां ब्रह्मविद्यामुपयंति आत्मभावेन श्रद्धाभक्तिपुरःसराः संतस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति॥ परं वा ब्रह्म गमयत्य

ॐ भद्रं कर्णेभिरिति शांतिः॥ ॐ ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता॥

विद्यादि संसारकारणं चात्यंतमवसादयति विनाशयतीत्युपनिषत् उपनिपूर्वस्य सदेरेवमर्थस्मरणात्॥ ब्रह्मा परिवृढो महान्
धर्मज्ञानवैराग्यैश्वर्यैः सर्वानन्यानतिशेत इति॥ देवानां द्योतनवतामिंद्रादीनां प्रथमो गुणैः प्रधानः सन्प्रथमोऽग्रे वा संबभूवाभिव्य
क्तः सम्यक्स्वातंत्र्येणेत्यभिप्रायः॥

विधिनेदृश्यत इति भावः॥ साधितं व्याख्येयत्वमुपसंहरति॥ एवमिति॥ ग्रंथे कथमुपनिषच्छब्दप्रयोग
इति शंकायामुपनिषच्छब्दवाच्यविद्यार्थत्वाद्ब्राह्मणिक इति दर्शयितुं विद्याया उपनिषच्छब्दार्थत्वमाह॥ य इमामिति॥ आत्मभावेनेति प्रेमास्पदतये
त्यर्थः॥ अनर्थपूगं क्लेशसमूहं निशातयति शिथिलीकरोति॥ अपरिपक्वज्ञानात् हि त्रैजन्मनिर्मोक्षसंभवादित्यर्थः॥ ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्प

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं.भा. ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयमिति स्मरणात्॥ धर्मज्ञानवैराग्यैश्वर्यैः सर्वानन्यानतिक्रम्य वर्तत इति परिवृढत्वं सिद्धमित्यर्थः॥ योसावतीं टी.
३ द्रियो ग्राह्यः सूक्ष्मोव्यक्तः सनातनः॥ सर्वभूतमयोऽचिंत्यः स एष स्वयमुद्बभौ॥ स्वयमुद्भूतशुक्रशोणितसंयोगमंतरेणाविर्भूत इति स्मृतेः॥ सांसार्य

नयथाधर्मोऽधर्मवशात्संसारिणोऽन्ये जायंते॥ योसावतींद्रियोऽग्राह्य इत्यादिस्मृतेः॥ विश्वस्य सर्वस्य जगतः कर्ता उत्पादयिता भुव
नस्योत्पन्नस्य गोप्ता पालयितेति विशेषणं ब्रह्मणो विद्यास्तुतये॥ स एवं प्रख्यातमहत्त्वो ब्रह्मा ब्रह्मविद्यां ब्रह्मणः परमात्मनो विद्यां
ब्रह्मविद्यां॥ येनाऽक्षरं पुरुषं वेद सत्यमिति विशेषणात्परमात्मविषया हि सा ब्रह्मणा वाग्रजेनोक्तेति ब्रह्मविद्यानां॥ सर्वविद्याप्र

सं ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह॥ [१] अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचांऽगिरे ब्रह्मवि
द्यां॥ स भारद्वाजाय सत्यवहाय प्राह भारद्वाजोंऽगिरसे परावरां [२]॥ तिष्ठां सर्वविद्याभिव्यक्तिहेतुत्वात्सर्वविद्याश्रयामित्यर्थः

॥ सर्वविद्यावेद्यं वा वस्त्वनयैव ज्ञायत इति॥ येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति श्रुतेः॥ सर्वविद्याप्रतिष्ठामिति चस्तो
ति॥ विद्यामथर्वाय ज्येष्ठपुत्राय प्राह॥ ज्येष्ठश्चासौ पुत्रश्चानेकेषु ब्रह्मणः सृष्टिप्रकारेष्वन्यतमस्य सृष्टिप्रकारस्य प्रमुखे पूर्वमथर्वा सृ
ष्ट इति ज्येष्ठः तस्मै ज्येष्ठपुत्राय प्राह उक्तवान् यामेतामथर्वणे प्रवदेत अवदत् ब्रह्मविद्यां ब्रह्मा॥ तामेव ब्रह्मणः प्राप्तामथर्वा पुरा पू
र्वमुवाचोक्तवानंगिरे अंगिर्नाम्ने ब्रह्मविद्यां॥ गम्यत इत्यर्थः॥ वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं ब्रह्मैव ब्रह्मविद्या॥ तच्च ब्रह्म सर्वाभिव्यंजकं रामः
॥ ततः सर्वविद्यानां व्यंजकतया आश्रय इति सर्वविद्याश्रया अथवा सर्वविद्यानां प्रतिष्ठा परिसमाप्तिर्भवति यस्यामुत्पन्नायां ज्ञातव्याभावात्सा सर्व ३

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

प्रश्नबीजमाह॥एकस्मिन्निति॥उपादानात्कार्यस्यपृथक्सत्वाभावादुपादानेज्ञातेतत्कार्यंततःपृथङ्नास्तीतिज्ञातंभवतीतिसामान्यव्याप्ति
स्तद्बलाद्वापप्रच्छेत्याह॥अथवेति॥प्रश्नासरांजस्यमाक्षिप्यसमाधत्ते॥नन्वविदितेहीत्यादिना॥किमस्तितदितिप्रयोगेऽक्षरबाहुल्येनायासःस्या

सत्यांगिर्भारद्वाजायभरद्वाजगोत्रायसत्यवहायसत्यवहनाम्नेप्राहप्रोक्तवान्॥भारद्वाजोंगिरसेस्वशिष्यायपुत्रायवापरावरांपरस्मादव
रेणप्राप्तेतिपरावरांसर्वविद्याविषयव्याप्तेर्वातांपरावरामंगिरसेप्राहेत्यनुषंगः॥शौनकःशुनकस्यापत्यंमहाशालोमहागृहस्थोंगिर
संभारद्वाजशिष्यमाचार्यंविधिवद्यथाशास्त्रमित्येतत्॥उपसन्नउपगतःसन्पप्रच्छपृष्टवान्॥शौनकांगिरसयोःसंबंधादर्वाग्विधिव
द्विशेषणादुपसदनविधेःपूर्वेषामनियमइतिगम्यते॥मर्यादाकरणार्थंवाविशेषणं॥मध्यदीपकन्यायार्थंवाविशेषणं॥अस्मदादि

शौनकोहवैमहाशालोंगिरसंविधिवदुपसन्नःपप्रच्छकस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीति३॥

ष्वप्युपसदनविधेरिष्टत्वात्॥किमित्याह॥कस्मिन्नुभगवोविज्ञाते॥नुइतिवितर्के॥भगवोभगवन्सर्वंयद्विज्ञेयंविज्ञातंविशेषणज्ञा
तमवगतंभवतीत्येकस्मिन्विज्ञातेसर्वविद्भवतीतिशिष्टप्रवादंश्रुतवान्शौनकस्तद्विशेषंविज्ञातुकामःसन्कस्मिन्निति वितर्कय
न्पप्रच्छ॥अथवालोकसामान्यदृष्ट्याज्ञात्वैवपप्रच्छ॥संतिहिलोकेसुवर्णादिशकलभेदाःसुवर्णत्वाद्येकत्वविज्ञानेनविज्ञायमानालौकि
कैस्तथाकिंन्वस्तिसर्वस्यजगद्भेदस्यैककारणंयदेकस्मिन्विज्ञातेसर्वंविज्ञातंभवतीति॥नन्वविदितेहिकस्मिन्निति प्रश्नोनुपपन्नः
किमस्ति॰तितदाप्रश्नोयुक्तःसिद्धेत्वस्तित्वेकस्मिन्नितिस्याद्यथाकस्मिन्निधेयमिति॥न॥ तद्दोरुतयाकस्मिन्नित्यसरांजस्येनाप
तद १

॥ मुण्डकभाष्यटीका ॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰भा॰ कल्पः सूत्रग्रंथः अनुष्ठेयक्रमः कल्प इत्यर्थः अविद्याया अपगम एव परप्राप्तिरुपचर्यते॥ अविद्यापगमश्च ब्रह्मावगतिरेवेति व्याख्यास्याम टी॰
४
अक्षरबाहुल्यादायासभीरुत्वात्प्रश्नः संभवत्येव॥ किंत्वेकस्मिन्विज्ञाते सर्वं वित्स्यादिति॥ तस्मै शौनकायांऽगिराह किलोवाच॥ कि
मित्युच्यते॥ द्वे विद्ये वेदितव्ये इत्येवं ह स्म किल यद्ब्रह्मविदो वेदार्थाभिज्ञाः परमार्थदर्शिनो वदंति॥ के ते इत्याह॥ परा च परमात्मवि
द्या अपरा च धर्माऽधर्मतत्साधनतत्फलविषया॥ ननु कस्मिन्विदिते सर्वं विद्भवतीति शौनकेन पृष्टं तस्मिन्वक्तव्येऽपृष्टमाहांगिरा
द्वे विद्ये इत्यादिनैष दोषः॥ क्रमापेक्षत्वात्प्रतिवचनस्यापरा हि विद्याऽविद्या सा निराकर्तव्या तद्विषये हि विदिते न किंचित्तत्त्वतो वि

तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदंति॥ परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथ
र्ववेदः शीक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति॥ अथ परा यया तदक्षरमधिगम्यते॥ दितं स्यादिति निराकृत्य

हि पूर्वपक्षं पश्चात्सिद्धांतो वक्तव्यो भवतीति न्यायात्॥ तत्र काऽपरेत्युच्यते॥ ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इत्येते चत्वारो वे
दाः॥ शीक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमित्यंगानि षडेषाऽपरा विद्या॥ अथेदानीमियं परा विद्योच्यते॥ यया तद्वक्ष्यमाण
विशेषणमक्षरमधिगम्यते प्राप्यते॥ अधिपूर्वस्य गमेः प्रायशः प्राप्त्यर्थत्वात्॥ न च परप्राप्तेरवगमार्थस्य च भेदोऽस्त्यविद्याया अपा
य एव हि परप्राप्तिर्नार्थांतरं॥ ननु ऋग्वेदादिबाह्या तर्हि सा कथं परा विद्या स्यान्मोक्षसाधनं च॥ या वेदबाह्याः स्मृतय इति हि स्मरंति॥ रामः
स्माभिः॥ ज्ञातो यस्तज्ज्ञप्तिर्वा अविद्यानिवृत्तिरित्येतद्व्याख्यानावसरेऽतोऽधिगमशब्दोऽत्र प्राप्तिपर्याय एवेत्याह॥ न च परप्राप्तेरिति ॥ ७ ॥ ५

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

सांगानांवेदानामपरविद्यात्वेनोपन्यासात्ततःपृथक्करणाद्वेदबाह्यतयाब्रह्मविद्यायाःपरत्वंनसंभवतीत्याक्षिपति॥नन्विति॥यावेदबाह्याः
स्मृतयोयाश्चकाश्चकुदृष्टयः॥सर्वास्तानिष्फलाःप्रेत्यतमोनिष्ठाहिताःस्मृताइतिस्मृतेः॥कुदृष्टित्वादनुपादेयास्यादित्यर्थः॥विद्यायावेदबाह्य
कुदृष्टित्वान्निष्फलत्वादनादेयास्यात्॥उपनिषदांचऋग्वेदादिबाह्यत्वंस्यात्॥ऋग्वेदादित्वेचपृथक्करणमनर्थकमथपरेति॥न॥
वेद्यविषयविज्ञानस्यविवक्षितत्वादुपनिषद्वेद्याक्षरविषयंहिविज्ञानमिहपराविद्येतिप्राधान्येनविवक्षितंनोपनिषच्छब्दरा
शिः॥वेदशब्देनतुसर्वत्रशब्दराशिर्विवक्षितः॥शब्दराश्यधिगमेपियत्नांतरमंतरेणगुर्वभिगमनादिलक्षणंवैराग्यंचनाक्षरा
धिगमःसंभवतीतिपृथक्करणंब्रह्मविद्यायाःपराविद्येति॥यथाविधिविषयेकर्त्राद्यनेककारकोपसंहारद्वारेणवाक्यार्थज्ञानका

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णं॥

लादन्यत्रानुष्ठेयोर्थोऽस्त्यग्निहोत्रादिलक्षणोनतथेहपरविद्याविषयेवाक्यार्थज्ञानसमकालएववस्तुपर्यवसितोभवति॥केवल
शब्दप्रकाशितार्थज्ञानमात्रनिष्ठाव्यतिरिक्ताभावात्॥तस्मादिहपरांविद्यांसविशेषणेनाक्षरेणविशिनष्टियत्तदद्रेश्यमित्यादिना
॥वक्ष्यमाणंबुद्धौसंहृत्यसिद्धवत्परामृशति॥यत्तदिति॥अद्रेश्यमदृश्यंसर्वेषांबुद्धींद्रियाणामगम्यमित्येतत्॥दृशेर्बहिःप्रवृत्तस्य
पंचेंद्रियद्वारकत्वात्॥अग्राह्यंकर्मेंद्रियाऽविषयमित्येतत्॥अगोत्रं॥ त्वेतदर्थानामुपनिषदामप्यृग्वेदादिबाह्यत्वंप्रसज्येतेत्यर्थः॥वे
दबाह्यत्वेनपृथक्करणंनभवतिकिंतुवैदिकस्यापिज्ञानस्यवस्तुविषयस्यशब्दराश्यतिरेकाभिप्रायेणेत्याह॥नवेद्यविषयेति॥ ७॥७॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰ भा॰ कर्मज्ञानाद्विलक्षणत्वाभिप्रायेणच पृथक्करणमित्याह॥ यत्तदिति विधिविषयद्वृति॥ अप्राप्तप्रतिषेधप्रसंगान्न प्रधानपरत्वमपि शंकनीयमिति टी॰
५
गोत्रमन्वयो मूलमित्यनर्थांतरमगोत्रमनन्वयमित्यर्थः॥ नहितस्य मूलमस्ति येनान्वितं स्यात्॥ वर्ण्यंत इतिवर्णा द्रव्यधर्माः स्थूलता
दयः शुक्लत्वादयोवा॥ विद्यमाना वर्णा यस्य तदवर्णमक्षरं॥ अचक्षुः श्रोत्रं चक्षुश्च श्रोत्रंच नामरूपविषये करणे सर्वजंतूनां ते अविद्य
माने यस्य तदचक्षुः श्रोत्रं॥ यः सर्वज्ञः सर्वविदित्यादि चेतनावत्त्वविशेषणत्वात्॥ प्राप्तं संसारिणामिव चक्षुः श्रोत्रादिभिः करणैरर्थसा ॥
धकत्वं तदिहाचक्षुः श्रोत्रमिति वार्यते॥ पश्यत्यचक्षुः सशृणोत्यकर्णइत्यादिदर्शनात् किंच॥ तदपाणिपादं कर्मेंद्रियरहितमित्येत
त्॥ यत एवमग्राह्यमग्राहकंचातो नित्यमविनाशि विभुं विविधं ब्रह्मादिस्थावरांतप्राणिभेदैर्भवतीति विभुं सर्वगतं व्यापकमाका

अचक्षुः श्रोत्रं तदपाणिपादं॥ नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीराः ६॥

शवत्सुसूक्ष्मं शब्दादिस्थूलत्वकारणरहितत्वात् शब्दादयो ह्याकाशवाय्वादीनामुत्तरोत्तरस्थूलत्वकारणानि तदभावात्सुसूक्ष्मं॥
किंच॥ तदव्ययं उक्तधर्मत्वादेव नव्येतीत्यव्ययं॥ नह्यनंगस्य स्वांगापचयलक्षणो व्ययः संभवति॥ शरीरस्येव नापि कोशाप
चयलक्षणो व्ययः संभवति राजइव नापि गुणद्वारको व्ययः संभवति॥ अगुणत्वात्सर्वात्मकत्वाच्च यदेवंलक्षणं॥ भूतयोनिं भूता
नां कारणं पृथिवीव स्थावरजंगमानां॥ परिपश्यंति सर्वतः आत्मभूतं सर्वस्याक्षरं पश्यंति धीरा धीमंतो विवेकिनः॥ ईदृशमक्षरं यया रामः
विद्यया धिगम्यते सा परा विद्येति समुदायार्थः॥ मत्वाह॥ यः सर्वज्ञइति॥ अगुणत्वादिति उपसर्जनरहितत्वात्सर्वात्मकत्वाच्चेति॥ हेयस्या ५

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

ब्रह्मनकारणंसहायशून्यत्वात्कुलालमात्रवदित्यस्यानैकांतिकत्वमुक्तमूर्णनाभिदृष्टांतेन॥ब्रह्मजगतोनोपादानंतद्भिन्नत्वात्स्वरूपस्ये
वेत्यनुमानांतरस्यानैकांतिकत्वमाह॥यथाचपृथिव्यामिति॥जगन्नब्रह्मोपादानंतद्विलक्षणत्वात्यद्धिविलक्षणंतत्तदुपादानकंनभवतिय

भूतयोन्यक्षरमित्युक्तंतत्कथंभूतयोनित्वमित्युच्यतेप्रसिद्धदृष्टांतैः॥यथालोकेप्रसिद्धऊर्णनाभिर्लूताकीटःकिंचित्कारणांतर
मनपेक्ष्यस्वयमेवसृजतेस्वशरीराव्यतिरिक्तानेवतंतून्बहिःप्रसारयतिपुनस्तानेवगृह्णतेचगृह्णातिस्वात्मभावमेवापादयति
॥यथाचपृथिव्यामोषधयोव्रीह्यादिस्थावरांताइत्यर्थः॥स्वात्माव्यतिरिक्ताएवप्रभवंति॥यथाचसतोविद्यमानाज्जीवतःपुरुषा
त्केशलोमानिकेशाश्मश्रुलोमानिसंभवंतिविलक्षणानि॥यथैतेदृष्टांतास्तथाविलक्षणंसलक्षणंचनिमित्तांतरानपेक्षात्यथोक्तल

यथोर्णनाभिःसृजतेगृह्णतेचयथापृथिव्यामोषधयःसंभवंति॥यथासतःपुरुषात्केशलोमानितथाक्षरात्संभवतीह
विश्वं॥७ क्षणादक्षरात्संभवतिसमुत्पद्यतेइहसंसारमंडलेविश्वंसमस्तंजगदनेकदृष्टांतोपादानंतुसुखार्थप्रबोधनार्थं॥य
द्ब्रह्मणउत्पद्यमानंविश्वंतदनेनक्रमेणोत्पद्यतेनयुगपद्बदरमुष्टिप्रक्षेपवदितिक्रमनियमविवक्षार्थोयंमंत्रआरभ्यते॥तपसाज्ञा
नेनोत्पत्तिविधिज्ञतयाभूतयोन्यक्षरंब्रह्मचीयतेउपचीयते॥उत्पिपादयिषदिदंजगदंकुरमिवबीजमुच्छूनतांगच्छतिपुत्रमिवपि

ताघटोनतंतूपादानकइत्यस्यव्यभिचारार्थमाह॥यथाचसतइति॥एकस्मिन्नपिदृष्टांतेसर्वानुमानानामनैकांतिकत्वंयोजयितुंशक्यमितिशं
कमानंप्रत्याहानेकदृष्टांतेति॥ईश्वरत्वोपाधिभूतंमायातत्त्वंमहाभूतादिरूपेणसर्वजीवैरुपलभ्यतइतिसर्वसाधारण्येपिकथंजायतेऽनादिसि

ताहर्षेण॥

इत्यादिसाशंक्याह॥याचिकीर्षितेति॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं. भा. ६

कर्मापूर्वसमवायिभूतसूक्ष्ममव्याकृतमितिकेचित्तन्नतस्यप्रतिजीवंभिन्नत्वात्तुईश्वरत्वोपाधित्वासंभवात्सामान्यरूपेणसंभवेपिपृथिव्या टी.
दिसामान्यानांबहुत्वात्प्रकृतावेकत्वश्रुतिव्याकोपापातान्जाड्यमहामायारूपेणैवसंभवेपिनकर्मापूर्वसमवायित्वंतस्याकारकत्वाद्बुध्यादी
नामेवकारकत्वाभिधानात्कारकावयवेष्वेवक्रियासमवायाभ्युपगमात्किंचनकार्यस्यस्वकारणप्रकृतित्वंदृष्टमितिभूतसूक्ष्मसपंचीकृतभूतप्र

एवंसर्वज्ञतयासृष्टिस्थितिसंहारशक्तिविज्ञानवत्तयोपचितात्ततोब्रह्मणोऽन्नमद्यतेभुज्यतइत्यन्नमव्याकृतंसाधारणंसंसारि
णांव्याचिकीर्षितावस्थारूपेणअभिजायतेउत्पद्यते॥ततश्चाव्याकृताद्व्याचिकीर्षितावस्थातोन्नात्प्राणोहिरण्यगर्भोब्रह्मणोज्ञा
नक्रियाशक्त्यधिष्ठितजगत्साधारणोविद्याकामकर्मभूतसमुदायबीजांकुरोजगदात्माभिजायतइत्यनुषंगः॥तस्माच्चप्राणान्म

तपसाचीयतेब्रह्मततोऽन्नमभिजायते॥अन्नात्प्राणोमनःसत्यंलोकाःकर्मसुचामृतं ८॥

नआख्यंसंकल्पविकल्पसंशयनिर्णयाद्यात्मकमभिजायते॥ततोपिसंकल्पाद्यात्मकान्मनसःसत्याख्यमाकाशादिभूतपंच
कमभिजायते॥तस्मात्सत्याख्याद्भूतपंचकादंडक्रमेणसप्तलोकाभूरादयस्तेषुमनुष्यादिप्राणिवर्णाश्रमक्रमेणकर्माणिकर्म
सुचनिमित्तभूतेषुअमृतंफलंयावत्कर्माणिकल्पकोटिशतैरपिनविनश्यंति॥तावत्फलंनविनश्यतीत्यमृतं॥

कृतित्वंनस्यात्तस्मान्महाभू
तसर्गादिसंस्कारास्पदंगुणत्रयसाम्यंमायातत्त्वमव्याकृतादिशब्दवाच्यमिहाभ्युपगंतव्यं॥पूर्वस्मिन्कल्पेहिरण्यगर्भप्राप्तिनिमित्तंप्रकृष्टंज्ञानंकर्म रामः
चयेनात्रष्ठितंतदनुग्रहायमायोपाधिकंब्रह्महिरण्यगर्भावस्थाकारेणविवर्ततेसचजीवतदवस्थाभिमानीहिरण्यगर्भउच्यतइत्यभिप्रेत्याह॥ब्रह्मण ६

ज्ञानशक्तिभिः क्रियाशक्तिभिश्चाधिष्ठितं विशिष्टं जगद्व्यष्टिरूपं तस्य साधारणः समष्टिरूपः सूत्रसंज्ञ इत्यर्थः मन आख्यमिति॥ समष्टिरूपं वि
वक्षितं व्यष्टिरूपस्य लोकस्य सृष्ट्युत्तरकालत्वाद्वक्ष्यमाणार्थमिति वक्ष्यमाणस्याविद्याविवरणप्रकरणस्यारंभार्थमुक्तपरविद्यासूत्रार्थोपसंहार
इत्यर्थः॥ सामान्येनेति समष्टिरूपेण मायाख्येनोपाधिनेत्यर्थः॥ विशेषेणेति॥ व्यष्टिरूपेणाविद्याख्येनोपाधिनाऽनंतजीवभावमापन्नः स एव स

उक्तमेवार्थमुपसंजिहीर्षुर्मंत्रो वक्ष्यमाणार्थमाह॥ यउक्तलक्षणोऽक्षराख्यः सर्वज्ञः सामान्येन सर्वं जानातीति सर्वज्ञः॥ विशेषेण स
र्वं वेत्तीति सर्ववित्॥ यस्य ज्ञानमयं ज्ञानविकारमेव सार्वज्ञलक्षणं तपो नायासलक्षणं॥ तस्माद्यथोक्तात्सर्वज्ञादेतदुक्तं कार्यल
क्षणं ब्रह्म हिरण्यगर्भाख्यं जायते॥ किंच॥ नामासौ देवदत्तयज्ञदत्त इत्यादिलक्षणं रूपमिदं शुक्लं नीलमित्यादि अन्नं च व्रीहियवादि

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः॥ तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ९॥ १ ॥इतिप्रथमखंडः

लक्षणं जायते॥ पूर्वमंत्रोक्तक्रमेणेत्यविरोधो द्रष्टव्यः॥ १॥ सांगा वेदा अपराविद्योक्ता ऋग्वेदो यजुर्वेद इत्यादिना॥ यत्तदद्रेश्यमित्या
दिना नामरूपमन्नं च जायत इत्यंतेन ग्रंथेनोक्तलक्षणमक्षरं यया विद्ययाऽधिगम्यत इति परा विद्या सविशेषेणोक्ता॥ वैस्वोपाधितस्त्वंस
ष्टं च वेत्तीत्यधिदैवमध्यात्मं च तत्त्वाभेदः सूत्रितः॥ स्रष्टृत्वं प्रजापतीनां तपसा प्रसिद्धं तद्वत्ब्रह्मणोपि स्रष्टृत्वं तपोनुष्ठानं वक्तव्यं॥ ततः
संसारित्वं प्रसज्येतेत्याशंक्याह॥ यस्य ज्ञानमयमिति॥ सत्वप्रधानमायायाः ज्ञानाख्यो विकारस्तदुपाधिकं ज्ञानविकारं सृज्यमानसर्वप
दार्थाभिज्ञत्वलक्षणं तपो न तु क्लेशरूपं प्रजापतीनामिवेत्यर्थः॥ इति प्रथमखंडः॥ १॥ अनादिरूपादानरूपेणानंतो ब्रह्मज्ञानात्स्वागंता

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰भा॰ ७ दित्यनेनपराहरेकजीववादिनः एकंचैतन्यमेकयैवाविद्ययाबद्धं संसरतितदेवकदाचिन्मुच्यतेनास्मदादीनां बंधमोक्षौस्तइतितदपास्तं भवतिश्रुतिबहिष्कृतत्वात् सुषुप्तेपिक्रियाकारकफलभेदरूपस्यप्रहाणंभवति॥ बुद्धिपूर्वकप्रहाणस्यततोविशेषमाह॥ सामस्त्येनेति॥ सोपाध्यविद्याकार्यस्याविद्याप्रहाणेनात्यंतिकप्रहाणंविद्याफलमित्यर्थः॥ अभयोऽपक्षयरहितः॥ अमृतोनाशरहितइत्यर्थः॥१॥ अपरवि टी॰

अतः परमनयोर्विद्ययोर्विषययोर्विवेक्तव्यौ संसारमोक्षाविस्तरतोग्रंथआरभ्यते॥ तत्राऽपरविद्याविषयः कर्त्रादिसाधनक्रियाफलभेद रूपः संसारोऽनादिरनंतोदुःखरूपत्वाद्धातव्यः॥ प्रत्येकंशरीरिभिः सामस्त्येननदीस्रोतोवदव्यवच्छेदरूपसंबंधस्तदुपशमलक्षणो मोक्षः परविद्याविषयोऽनाद्यनंतोऽजरोऽमरोऽमृतोऽभयःशुद्धःप्रसन्नःस्वात्मप्रतिष्ठालक्षणः परमानंदोऽद्वयइति॥ पूर्वंतावदपर

तदेतत्सत्यं॥ मंत्रेषुकर्माणिकवयोयान्यपश्यंस्तानित्रेतायांबहुधासंततानि ॥

विद्याविषयप्रदर्शनार्थमारंभः॥ तद्दर्शनेहितन्निर्वेदोपपत्तेस्तथाचवक्ष्यति॥ परीक्ष्यलोकान्कर्मचितानित्यादिना॥ नह्यप्रदर्शि तेपरीक्षोपपद्यतइतितत्प्रदर्शयन्नाह॥ तदेतत्सत्यमवितथं॥ किंतन्मंत्रेषुऋग्वेदाद्याख्येषुकर्माण्यग्निहोत्रादीनिमंत्रैरेवप्रका शितानिकवयोमेधाविनोवसिष्ठादयोयान्यपश्यन्दृष्टवंतोयत्तदेतत्सत्यं॥ द्यायाः परविद्यायाश्चविषयौप्रदर्श्यपूर्वमपरविद्याविषय

प्रदर्शनेश्रुतेरभिप्रायमाह॥ पूर्वंतावदिति॥ यदिष्टसाधनतयाऽनिष्टसाधनतयावावेदेनबोध्यतेकर्मतत्स्यासतिप्रतिबंधेतत्साधनत्वा राम: ७ व्यभिचारः सत्यत्वंनस्वरूपाबाध्यत्वंप्रवाहेतइत्यादिनानिंदितत्वात्स्वरूपबाध्यत्वेपिचअर्थक्रियासामर्थ्यस्वप्नकामिन्यामिवघटतइत्य

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

ऋग्वेदविहितः पदार्थो हौत्रं ॥ यजुर्वेदविहितआध्वर्यवं ॥ सामवेदविहितऔद्गात्रं ॥ तद्रूपायां त्रेतायामित्यर्थः ॥ सत्यकामा मोक्षकामा इतिस
मुच्चयाभिप्रायेण व्याख्यानमयुक्तं एष वः पंथाः सुकृतस्य लोक इति स्वर्गफलसाधनत्वविषयवाक्यशेषविरोधादिति आहवनीयस्य दक्षि

एकांतपुरुषार्थसाधनत्वात्तानि च वेदविहितानि ऋषिदृष्टानि कर्माणि त्रेतायां त्रयीसंयोगलक्षणायां हौत्राध्वर्यवौद्गात्रप्रकारा
यामधिकरणभूतायां बहुधा बहुप्रकारं संततानि निर्वृत्तानि कर्मिभिः क्रियमाणानि त्रेतायां वा युगे प्रायशः प्रवृत्तानि ॥ अतो यूयं ता
न्याचरथ निर्वर्तयथ ॥ नियतं सैंस्य ॥ सत्यकामा यथाभूतकर्मफलकामाः संत एष वो युष्माकं पंथा मार्गः सुकृतस्य स्वयं निर्वर्तितस्य क

तान्याचरथ नियतं सत्यकामा एष वः पंथाः सुकृतस्य लोके ॥१॥ यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने तदाज्यभा
गावंतरेणाहुतीः प्रतिपादयेत् ॥२॥ र्मणो लोके फलनिमित्तं लोक्यते दृश्यते भुज्यत इति कर्मफलं लोक उच्यते ॥ तदर्थं तत्प्राप्तये

एष मार्ग इत्यर्थः ॥ यान्येतान्यग्निहोत्रादीनि त्रय्यां विहितानि कर्माणि तान्येष पंथा अवश्यफलप्राप्तिसाधनमित्यर्थः ॥ तत्राग्निहोत्रमेव
तावत्प्रथमं प्रदर्शनार्थमुच्यते सर्वकर्मणां प्राथम्यात् ॥ तत्कथं यदैवेंधनैरभ्याहितैः सम्यगिद्धे हव्यवाहने लेलायति चलति अर्चिस्तदा तत्
स्मिन्काले लेलायमाने चलति अर्चिषि आज्यभागावाज्यभागयोरंतरेण मध्ये आवापस्थाने आहुतीः प्रतिपादयेत् प्रक्षिपेद्देवतामुद्दिश्यानेकाः

णोत्तरपार्श्वयोराज्यभागाविज्येते ॥ इंद्राय स्वाहा प्रजापतये स्वाहेति दर्शपूर्णमासे तयोर्मध्येऽन्ये यागा अनुष्ठीयंते तन्मध्यमावापस्थानमुच्यते अग्नि
होत्राहुत्योर्हि संप्रसिद्धः सूर्याय स्वाहा प्रजापतये स्वाहेति प्रातरग्नये स्वाहा प्रजापतये स्वाहेति सायं कथमग्निहोत्रे प्रक्षेप्याहुतीरिति बहुवचनं तत्राह ॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं·भा· अनेकेष्वहःसुप्रयोगानुष्ठानानितदपेक्षयेत्यर्थः॥दर्शस्याग्निहोत्रांगत्वेप्रमाणाभावात्कथंतदकरणमग्निहोत्रस्यविप्रतिपत्तिरित्या टी·
८ शंकयायावज्जीवचोदनावशादग्निहोत्रिणोवश्यकर्तव्यत्वात्तदकरणंभवेद्विपत्तिरित्यभिप्रेत्यविशेषणंशरदादिषुनूतनान्नेनकर्तव्यमा

प्रयोगापेक्षयाआहुतीरितिबहुवचनं॥एषसम्यगाहुतिप्रक्षेपादिलक्षणःकर्ममार्गोलोकप्राप्तयेपंथास्तस्यचसम्यक्करणंदुष्करंवि
पत्तयस्त्वनेकाभवंति॥कथंयस्याग्निहोत्रिणोऽग्निहोत्रमदर्शंदर्शाख्येनकर्मणावर्जितमग्निहोत्रिणोऽवश्यकर्तव्यत्वाद्दर्शस्याग्नि
होत्रसंबंध्यग्निहोत्रविशेषणमिवभवतीतितदक्रियमाणमित्येतत्तथापौर्णमासमित्यादिष्वपिअग्निहोत्रविशेषणत्वंद्रष्टव्यंअ
ग्निहोत्रांगत्वस्याविशिष्टत्वादपौर्णमासंपौर्णमासकर्मवर्जितमचातुर्मास्यंचातुर्मास्यकर्मवर्जितमनाग्रयणंचआग्रयणंशरदादिक

यस्याग्निहोत्रमदर्शमपौर्णमासमचातुर्मास्यमनाग्रयणमतिथिवर्जितंच।अहुतमवैश्वदेवमविधिनाहुतमासप्त
मांस्तस्यलोकान्हिनस्ति॥३॥

र्तव्यंतच्चनक्रियतेयस्यतथाऽतिथिवर्जितंचातिथिपूजनंचाहन्यहन्यक्रियमाणंयस्य।स्वयंस
म्यक्चाग्निहोत्रंकालेअहुतंअदर्शादिवदवैश्वदेवंवैश्वदेववर्जितंहूयमानमप्यविधिनाहुतंनयथाहुतमित्येतदेवंदुःसंपादि
तमसंपादितमग्निहोत्राद्युपलक्षितंकर्मकिंकरोतीत्युच्यते॥आसप्तमान्सप्तसमाहितांस्तस्यकर्तुर्लोकान्हिनस्तिहिनस्तीवाऽ
यासमात्रफलत्वात्सम्यक्क्रियमाणेषुहिकर्मसुकर्मपरिणामानुरूपेणभूरादयःसत्यांताःसप्तलोकाः

ग्रयणंकर्मअदर्शादिवद्वैश्वदे राम:
वमितिविशेषणंवैश्वदेवस्याग्निहोत्रांगत्वेप्यावश्यकत्वादित्यर्थः॥पिंडोदकदानेनपित्रादीनांत्रयाणामुपकरोतियजमानःपुत्रादीनांचत्रया ८

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

णांग्रासादिदानेनततोमध्यवर्तिनायजमानेनसंबध्यमानाः पूर्वत्रयउत्तरेचग्रहांलइत्याह॥ पिंडदानादीति॥ आहुतयोयजमानंवहंती

फलंप्राप्यंतेतेलोकाएवंभूतेनअग्निहोत्रादिकर्मणात्प्राप्यत्वाद्धिंस्यंतइवायासमात्रंत्वव्यभिचारीत्यतोहिनस्तीत्युच्यतेहि॥
पिंडदानाद्यनुग्रहेणवासंबध्यमानाःपितृपितामहप्रपितामहपुत्रपौत्रप्रपौत्रस्वात्मोपकाराःसप्तलोकाउक्तप्रकारेणाग्निहो
त्रादिनानभवंतीतिहिंस्यंतइत्युच्यते॥ कालीकरालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा॥ स्फुलिंगिनीविश्वरुचीचदेवीले
लायमानाइतिसप्तजिह्वाः॥ काल्याद्याविश्वरुच्यंताललायमानाअग्नेर्हविराहुतिग्रसनार्थाएताःसप्तजिह्वाः॥ एतेष्वग्निजि

कालीकरालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा॥ स्फुलिंगिनीविश्वरुचीचदेवीलेलायमानाइतिसप्तजि
ह्वाः॥४॥ एतेषुयश्चरतेभ्राजमानेषुयथाकालंचाहुतयोह्याददायन्॥ तंनयंत्येताःसूर्यस्यरश्मयोयत्रदेवानांपतिरेको
धिवासः॥५॥ एह्येहीतितमाहुतयःसुवर्चसःसूर्यस्यरश्मिभिर्यजमानंवहंति॥ ह्वाभेदेषुयोग्निहोत्रीचरतेकर्माचरतिअग्नि

होत्रादिभ्राजमानेषुदीप्यमानेषुयथाकालंचयस्यकर्मणोयःकालःतत्कालंयथाकालंयजमानमाददायन्नाददानाआहुतयोयजमा
नेननिर्वर्तितास्तंनयंतिप्रापयंत्येताआहुतयोयाइमाअनेननिर्वर्तिताःसूर्यस्यरश्मयोभूत्वारश्मिद्वारैरित्यर्थः॥ यत्रयस्मिन्स्वर्गेदे
वानांपतिरिंद्रःसर्वानुपर्यधिवसतीत्यधिवासः॥ कथंसूर्यस्यरश्मिभिर्वहंतीत्युच्यते॥ एह्येहीत्याह्वयंत्यःसुवर्चसःदीप्तिमत्यः॥ किंच
प्रियामिष्टांवाचंस्तुत्यादिलक्षणामभिवदंत्यउच्चारयंत्योऽर्चयंत्यःपूजयंत्यश्चैषवोयुष्माकंपुण्यःसुकृतःपंथाःब्रह्मलोकःफलरूपः॥ तिसंबंधः॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰भा॰ रूप्यतेनिरूप्यतेयदाश्रयतयायज्ञस्तेयज्ञरूपाः॥स्वयमेवेतितत्त्वदर्श्युपदेशानपेक्षतयास्वमनोरथेनैवेत्यर्थः॥ ७॥ ७॥ ७॥ ७॥ टी॰
९ एवंप्रियांवाचमभिवदंत्योवहंतीत्यर्थः॥ब्रह्मलोकःस्वर्गःप्रकरणात्॥एतच्चज्ञानरहितंकर्मैतावत्फलमविद्याकामकार्यमतोऽसारं
दुःखमूलमितिनिंद्यते॥प्लवाविनाशिनइत्यर्थोहियस्मादेतेअदृढाअस्थिरायज्ञरूपायज्ञरूपाणियज्ञनिर्वर्तकाः॥अष्टादशशब्द
शसंख्याकाःषोडशर्त्विजःपत्नीयजमानश्चेत्यष्टादश॥एतदाश्रयंकर्मउक्तंकथितंशास्त्रेण॥येष्वष्टादशस्ववरंकेवलंज्ञानवर्जि
तंकर्मातस्तेषामवरकर्माश्रयाणांअष्टादशानामदृढतयाप्लवत्वात्प्लवतेसहफलेनतत्साध्यंकर्मकुंडविनाशादिवक्षीरदध्या

प्रियांवाचमभिवदंत्योवहंत्येषवःपुण्यःसुकृतोब्रह्मलोकः॥प्लवाह्येतेअदृढायज्ञरूपाअष्टादशोक्तमवरंये
षुकर्म॥एतच्छ्रेयोयेऽभिनंदंतिमूढाजरामृत्युंतेपुनरेवापियंति॥ ७ अविद्यायामंतरेवर्तमानाःस्वयंधीराःपंडितंमन्य
मानाः॥जंघन्यमानाःपरियंतिमूढाअंधेनैवनीयमानायथांधाः॥ ८ दीनांतत्स्थानांनाशोयतएवमेतत्कर्मश्रेयःश्रेयःक

रणंइतियेऽभिनंदंत्यभिहृष्यंत्यविवेकिनोमूढाअतस्तेजरांचमृत्युंचजरामृत्युंकिंचित्कालंस्वर्गेस्थित्वापुनरेवापियंतिभूयो
पिगच्छंति॥किंच॥अविद्यायामंतरेमध्येवर्तमानाअविवेकप्रायाःस्वयंवयमेवधीराधीमंतःपंडिताविदितवेदितव्याश्चेतिम
न्यमानाआत्मानंसंभावयंतस्तेचजंघन्यमानाजरारोगाद्यनेकानर्थव्रातैर्हन्यमानाभृशंपीड्यमानाःपरियंतिभ्रमंतिमूढादर्श राम:
नवर्जितत्वादंधेनैवाचक्षुष्केणैवनीयमानाःप्रदर्श्यमानमार्गायथालोकेऽधाश्चक्षुरहितागर्तकंटकादौपतंतितद्वत्॥किंच॥ ९

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

कंसुखंनभवत्यकंदुःखंतन्नास्तिविद्यतेयस्मिन्नसौनाकः केवलकर्मिणांफलमुक्त्वासगुणब्रह्मज्ञानसहिताश्रमकर्मिणांफलंसंसारगोच

अविद्यायांबहुधाबहुप्रकारंवर्तमानावयमेवकृतार्थाःकृतप्रयोजनाइत्येवमभिमन्यंतिअभिमानंकुर्वंतिबालाअज्ञानिनो
यद्यस्मादेवंकर्मिणोनप्रवेदयंतितत्त्वंनजानंतिरागात्कर्मफलरागाभिभवनिमित्तंतेनकारणेनातुराःदुःखार्ताःसंतःक्षीण
लोकाःक्षीणकर्मफलस्वर्गलोकाश्च्यवंते ॥ इष्टापूर्तंइष्टंयागादिश्रौतंकर्म॥पूर्तंस्मार्तंमन्यमानाएतदेवातिशयेनपुरुषार्थ
साधकंवरिष्ठंप्रधानमितिचिंतयंतोऽन्यदात्मज्ञानाख्यंश्रेयःसाधनंनवेदयंतेनजानंतिप्रमूढाःपुत्रपशुबंधादिषुप्रमत्ततया

अविद्यायांबहुधावर्तमानावयंकृतार्थाइत्यभिमन्यंतिबालाः॥यत्कर्मिणोनप्रवेदयंतिरागात्तेनातुराःक्षीणलोकाः
श्च्यवंते॥इष्टापूर्तंमन्यमानावरिष्ठंनान्यच्छ्रेयोवेदयंतेप्रमूढाः॥नाकस्यपृष्ठेतेसुकृतेऽनुभूत्वेमंलोकंहीनतरंवाविशं
ति॥तपःश्रद्धेयेह्युपवसंत्यरण्येशांताविद्वांसोभैक्ष्यचर्यांचरंतः॥ मूढास्तेचनाकस्यस्वर्गस्यपृष्ठेउपरिस्थानेसुकृतेभोगाय
तनेऽनुभूत्वाऽनुभूयकर्मफलंपुनरिमंलोकंमानुषमस्माद्धीनतरंवातिर्यङ्नरकादिलक्षणंयथाकर्मशेषंविशंति॥येपुनस्तद्विपरी
ताज्ञानयुक्तावानप्रस्थाःसन्यासिनश्चतपःश्रद्धेहि।तपःस्वाश्रमविहितंकर्म॥श्रद्धाहिरण्यगर्भादिविषयाविद्या।तेतपःश्रद्धेउप
वसंतिसेवंते॥अरण्येवर्तमानाःसंतःशांताउपरतकरणग्रामाविद्वांसोगृहस्थाश्चज्ञानप्रधानाइत्यर्थः॥भैक्ष्यचर्यांचरंतःपरिग्र
हाभावात्उपवसंत्यरण्यइतिसंबंधः॥ रमेवदर्शयति॥येपुनस्त द्विपरीताज्ञानयुक्ताइत्यादिना ॥ ९ ॥ ९ ॥ ९ ॥

मुं·भा· अरण्येस्त्रीजनासंकीर्णेदेशे॥मुक्तानामिहैवसर्वकामप्रविलयंसर्वात्मभावंचदर्शयंतिश्रुतयोब्रह्मलोकप्राप्तिस्तुदेशपरिच्छिन्नंफलंततोन टी·
१० मोक्षइत्याह॥इहैवेति॥ब्रह्माचतुर्मुखःविश्वसृजःप्रजापतयोमरीचिप्रभृतयःधर्मोयमोमहान्सूत्रात्माअव्यक्तंत्रिगुणात्मिकाप्रकृतिःसा

सूर्यद्वारेणसूर्योपलक्षितेनोत्तरेणपथातेविरजाःविरजसःक्षीणपुण्यपापकर्माणःसंतइत्यर्थः॥प्रयांतिप्रकर्षेणयांति॥यत्रयस्मि
न्सत्यलोकादौअमृतःसपुरुषःप्रथमजोहिरण्यगर्भोहिअव्ययात्माऽव्ययस्वभावः॥यावत्संसारस्थायीएतदंतास्तुसंसारगतयोऽप
रविद्यागम्याः॥नन्वेतन्मोक्षमिच्छंतिकेचिन्नेहैवसर्वंप्रविलीयंतिकामाःतेसर्वगंसर्वतःप्राप्यधीरायुक्तात्मानःसर्वमेवाविशंतीत्या
दिश्रुतिभ्यः॥अप्रकरणाच्चापरविद्याप्रकरणेहिप्रवृत्ते।नह्यकस्मान्मोक्षप्रसंगोस्तिविरजस्त्वंत्वापेक्षिकंसमस्तमपरविद्याकार्यंसा

सूर्यद्वारेणतेविरजाःप्रयांतियत्रामृतःसपुरुषोह्यव्ययात्मा[११]॥

ध्यसाधनलक्षणंक्रियाकारकभेदभिन्नंद्वैतमेतावदेवयद्धिरण्यगर्भप्राप्त्यवसानं॥तथाचमनुनोक्तंस्थावराद्यांसंसारगतिमनुक्रा
मता॥ब्रह्माविश्वसृजोधर्मोमहानव्यक्तमेवच॥उत्तमांसात्त्विकीमेतांगतिमाहुर्मनीषिणइति॥अथेदानीमस्मात्साध्यसाधनरूपा
त्सर्वस्मात्संसाराद्विरक्तस्यपरस्यांविद्यायामधिकारप्रदर्शनार्थमिदमुच्यते॥परीक्ष्य॥यदेतदृग्वेदाद्यपरविद्याविषयंस्वाभाविका

त्विकींसत्वपरिणामज्ञानसहितकर्मफलभूतामित्यर्थः॥ऐहिककर्मफलस्यपुत्रादेर्नाशविषयंप्रत्यक्षंविमतमनित्यंकृतकत्वात्घटवदित्यनुमा राम:
नमामुष्मिकनाशविषयं॥तद्यथेहकर्मजितोलोकःक्षीयतइत्याद्यागमस्तैरनित्यत्वेनसर्वात्मनावधार्येत्यर्थः॥ छ ॥ छ ॥ छ ॥ १०

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

नैतादृशंब्राह्मणस्यास्तिवित्तंयथैकतासमतासत्यताचशीलंस्थितिर्दंडनिधानमार्जवंततश्चोपरमःक्रियाभ्यइतिस्मृतेः॥ब्राह्मणस्यैवाधि
ऽविद्याकामकर्मदोषवत्पुरुषानुष्ठेयमविद्यादिदोषवंतमेवपुरुषंप्रतिविहितत्वात्तदनुष्ठानकार्यभूताश्चलोकायेदक्षिणोत्तरमार्ग
लक्षणाःफलभूतायेचविहिताऽकरणप्रतिषेधातिक्रमदोषसाध्यानरकतिर्यक्प्रेतलक्षणास्तानेतान्परीक्ष्यप्रत्यक्षानुमानागमैःसर्व
तोयाथात्म्येनावधार्यलोकान्संसारगतिभूतानव्यक्ताद्यान्स्थावरांतान्व्याकृताव्याकृतलक्षणान्बीजांकुरवदितरेतरोत्पत्तिनिमित्तान
नेकानर्थशतसहस्रसंकुलान्कदलीगर्भवदसारान्मायामरीच्युदकगंधर्वनगराकारस्वप्नजलबुद्बुदफेनसमान्प्रतिक्षणप्रध्वंसान्पृ
ष्ठतःकृत्वाऽविद्याकामदोषप्रवर्तितकर्मचितान्धर्माऽधर्मनिर्वर्तितानित्येतद्ब्राह्मणस्यैवविशेषतोऽधिकारःसर्वत्यागेनब्रह्मविद्यायामि

परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायान्नास्त्यकृतःकृतेन॥

तिब्राह्मणग्रहणं॥परीक्ष्यलोकान्किंकुर्यादित्युच्यते॥निर्वेदंनिःपूर्वोविदिरत्रवैराग्यार्थेवैराग्यंकुर्यादित्येतत्सवैराग्यप्रकारःप्रदर्श्य
ते॥इहसंसारेनास्तिकश्चिदपिअकृतःपदार्थः॥सर्वएवहिलोकाःकर्मचिताःकर्मकृतत्वाच्चानित्याःननित्यंकिंचिदस्तीत्यभिप्रायः
॥सर्वंतुकर्मानित्यस्यैवसाधनंयस्माच्चतुर्विधमेवहिसर्वंकर्मकार्यं॥उत्पाद्यमाप्यंविकार्यंसंस्कार्यंच॥नातःपरंकर्मणोविशेषोस्ति
अहंचनित्येनामृतेनाभयेनकूटस्थेनाचलेनध्रुवेणार्थेनार्थीनतद्विपरीतेनातःकिंकृतेनकर्मणाऽऽयासबहुलेनानर्थसाधनेनेत्ये
वंनिर्विण्णः॥ कारइत्यर्थः॥कूटस्थेनपरिणामरहितेनाचलेनस्पंदरहितेनध्रुवेणप्रयत्नरहितेनाहमर्थीसमित्पाणिरितिविनयोपलक्षण

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मक्षरणादिव्ययत्वान्यथाभावलक्षणपरिणामशून्यत्वादक्षतत्वादिति अक्षयत्वाच्चेति अशरीरत्वात् विकारशून्यत्वादित्यर्थः॥ प्रथमखंडकं॥१॥

अभयं शिवमकृतं नित्यं पदं यत्तद्विज्ञानार्थं विशेषेणाधिगमार्थं स निर्विण्णो ब्राह्मणो गुरुमेवाचार्यं शमदमदयादिसंपन्नमभिगच्छे-च्छास्त्रज्ञोपि स्वातंत्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यादित्येतद्गुरुमेवेत्यवधारणफलं॥ समित्पाणिः समिद्भारगृहीतहस्तः श्रोत्रियमध्ययनश्रुतार्थसंपन्नं ब्रह्मनिष्ठं हित्वा सर्वकर्माणि केवलेऽद्वये ब्रह्मणि निष्ठा यस्य सोयं ब्रह्मनिष्ठः॥ जपनिष्ठस्तपोनिष्ठ इति यद्वत्॥ न हि कर्मिणो ब्रह्मनिष्ठता संभवति कर्मात्मज्ञानयोर्विरोधात्॥ तं गुरुं विधिवदुपसन्नः प्रसाद्य पृच्छेदक्षरं पुरुषं सत्यं॥ तस्मै स विद्वान् गुरुर्ब्रह्मविदुपसन्नायोपगताय सम्यग्यथाशास्त्रमित्येतत्॥ प्रशांतचित्तायोपरतदर्पादिदोषाय शमान्विताय बाह्येंद्रियोपरमेण युक्ता

तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं॥ १२ तस्मै स विद्वानुपसंनाय सम्यक्प्रशांतचित्ताय शमा-न्विताय॥ येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां॥२॥ इति द्वितीयखंडः

यत्सर्वतो विरक्ताय येत्येतद्येन विज्ञानेन यया विद्यया परया ऽक्षरमद्रेश्यादिविशेषणं तदेवाक्षरं पुरुषशब्दवाच्यं पूर्णत्वात्पुरिशयनाच्च सत्यं तदेव परमार्थस्वाभाव्यादक्षरं चाक्षरणादक्षतत्वादक्षयत्वाच्च वेद विजानाति तां ब्रह्मविद्यां तत्त्वतो यथावत्प्रोवाच प्रब्रूयादित्यर्थः॥ आचार्यस्याप्ययं नियमो यन्न्यायप्राप्तसच्छिष्यनिस्तारणमविद्यामहोदधेः॥२॥ इति प्रथममुंडकं समाप्तं॥१॥

द्वे विद्ये वेदितव्ये इत्युपन्यस्यापरविद्यां मुंडकेन प्रपंच्य परविद्यां सूत्रितां प्रपंचयितुं द्वितीयमुंडकारंभ इत्याह॥ अपरविद्याया इत्यादिना॥ कर्मणोपि प्राक्सत्यत्वमुक्तं तद्वदिदं सत्यत्वं न मंतव्यमित्याह॥ यदपरविद्याविषयमिति ॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

विधीयतेविशेष्यतेविद्याऽनेनेतिव्युत्पत्त्याविषयशब्दस्यवस्तुपरत्वान्नपुंसकलिंगत्वंपरमार्थतःसल्लक्षणत्वादत्यंताबाध्यत्वादित्यर्थः॥ अत्यंत
परोक्षत्वादितिशास्त्रैकगम्यत्वादपूर्ववत्ब्रह्मणःप्रत्यक्षत्वंनसंभवति॥ साक्षात्काराधीनंचकैवल्यंततःकथंनामसत्यमक्षरंप्रत्यक्षवत्प्रति

अपरविद्यायाःसर्वंकार्यमुक्तंसचसंसारोयत्सारोयस्मान्मूलादक्षरात्संभवतियस्मिंश्चप्रलीयतेतदक्षरंपुरुषाख्यंसत्यंयस्मिन्वि
ज्ञातेसर्वमिदंविज्ञातंभवतितत्परस्याविद्यायाविषयःसवक्तव्यइतिउत्तरोग्रंथआरभ्यते॥ यदपरविद्याविषयंकर्मफललक्षणंसत्यं
तदापेक्षिकमिदंतुपरविद्याविषयंपरमार्थसल्लक्षणत्वात्तदेतत्सत्यंयथाभूतंविद्याविषयमविद्याविषयत्वादनृतमितरदत्यंतपरोक्ष
त्वात्कथंनामप्रत्यक्षवत्सत्यंअक्षरंप्रतिपद्येरन्निति॥ दृष्टांतमाह॥ यथासुदीप्तात्पावकादग्नेर्विस्फुलिंगाअग्न्यवयवाःसहस्रशोऽने

तदेतत्सत्यं॥ यथासुदीप्तात्पावकाद्विस्फुलिंगाःसहस्रशःप्रभवंतेसरूपाः॥ तथाक्षराद्विविधाःसोम्यभावाःप्रजायंतेतत
त्रचैवापियंति॥१॥ कशःप्रभवंतेनिर्गच्छंतिसरूपा॥ अग्निसलक्षणाएवतथोक्तलक्षणादक्षराद्विविधानानादेहोपाधिभेदमनुवि

धीयमानत्वाद्विविधाहेसोम्यभावाजीवाआकाशादिवघटादिपरिच्छिन्नाःसुषिरभेदाघटाद्युपाधिप्रभेदमनुभवंत्येवंनानानामरूपकृत
देहोपाधिप्रभवमनुप्रजायंते॥ तत्रचैवतस्मिन्नेवाक्षरेऽपियंतिदेहोपाधिविलयमनुलीयंते॥ घटादिविलयमन्विवसुषिरभेदाः॥ यथा
काशस्यसुषिरभेदोत्पत्तिप्रलयनिमित्तत्वंघटाद्युपाधिकृतमेवतद्वदक्षरस्यापिनामरूपकृतदेहोपाधिनिमित्तमेवजीवोत्पत्तिप्रलयनिमित्त

पद्येरन्मुमुक्षवइत्यभिप्रेत्यजीवब्रह्मणोरेकत्वेदृष्टांतमाह॥ यथासुदीप्तादिति॥ एकत्वेसतिप्रत्यग्रूपस्यअपरोक्षत्वात्ब्रह्मणोपिप्रत्यक्षत्वंभविष्यति॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

घटैकदेशप्रत्यक्षत्वेघटप्रत्यक्षवदित्यर्थः॥ विभक्तदेशावच्छिन्नत्वेनविस्फुलिंगेष्ववयवत्वादिव्यवहारःस्वतःपुनरग्न्यात्मत्वमेवोष्णप्रकाशत्वाविशेषा त्तथाचिद्रूपत्वाविशेषाज्जीवानांस्वतोब्रह्मत्वमेवेत्यर्थः॥ अक्षरस्यापिजीवोत्पत्तिप्रलयनिमित्तत्वमौपाधिकमुक्तमेकत्वसिद्ध्यर्थंतत्वतस्तुनिमित्त नैमित्तिकभावोपिनास्तीत्याह॥ नामरूपबीजभूतादिति॥ देहाद्यपेक्षयायद्बाह्यमांतरंचप्रसिद्धंतेनसहतत्तादात्म्येनतदधिष्ठानतयावर्ततेइति

नामरूपबीजभूतादव्याकृताख्यात्स्वविकारापेक्षयापरादक्षरात्परंयत्सर्वोपाधिभेदवर्जितमक्षरस्यैवस्वरूपमाकाशस्येव सर्वमूर्तिवर्जितंनेतिनेतीत्यादिविशेषणंविवक्षन्नाह॥ दिव्यःद्योतनवान्॥ स्वयंज्योतिष्ट्वाद्दिविवास्वात्मनिभवोऽलौकिकोवा॥ हियस्मादमूर्तःसर्वमूर्तिवर्जितःपुरुषःपूर्णःपुरिशयःदिव्योह्यमूर्तःपुरुषः॥ सबाह्याभ्यंतरःसबाह्याभ्यंतरेणवर्ततइति॥ अजोनजा

दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः

यतेकुत

श्चित्स्वतोन्यस्यजन्मनिमित्तस्यचाभावात्॥ यथाजलबुद्बुदादेर्वाय्वादि। यथानभःसुषिरभेदानांघटादि॥ सर्वभावविकाराणांजनिमू लत्वात्तत्प्रतिषेधेनसर्वेप्रतिषिद्धाभवंति॥ सबाह्याभ्यंतरोह्यजोऽतोऽजरोऽमृतोऽक्षरोध्रुवोऽभयइत्यर्थः॥ यद्यपिदेहाद्युपाधिभेददृ ष्टीनामविद्यावशाद्देहभेदेषुसप्राणःसमनाःसेंद्रियःसविषयइवप्रत्यवभासतेतलमलादिमदिवाकाशंतथापितुस्वतःपरमार्थदृष्टीनामप्रा

सबाह्याभ्यंतरोऽतएवसर्वात्मत्वात्तद्व्यतिरिक्तनिमित्ताभावादजइत्यर्थः॥ जायतेऽस्तिविपरिणमतेवर्द्धतेअपक्षीयतेविनश्यतीत्येवमादिभावविकारा णांनिषेधात्तात्पर्यमजशब्दस्याह॥ सर्वभावविकाराणामिति॥ जीवानांप्राणादिमत्वात्तदात्मत्वेब्रह्मणोपिप्राणादिमत्वंप्राप्तंतन्निवर्तयति॥ यद्यपीत्यादिना॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

स्मृतिसंशयाद्यनेकज्ञानेषुशक्तिविशेषोअस्यास्तीतितथोक्तं॥नामरूपयोर्बीजंब्रह्मतस्योपाधितयालक्षितंशुद्धस्यकारणत्वात्तपपर्यागमितंस्वरूपमस्येतितथोक्तंतस्मादुपाधिरूपात्तद्विशिष्टरूपाच्चपरतोऽक्षरात्परइतिसंबंधः॥कथंमायातत्वस्याक्षरस्यपरत्वमित्याकांक्षायामाह॥

ऽविद्यमानःक्रियाशक्तिभेदवांश्चलनात्मकोवायुर्यस्मिन्असावप्राणस्तथाअमनाअनेकज्ञानशक्तिभेदवत्संकल्पाद्यात्मकंमनोप्यविद्यमानंयस्मिन्सोयममनाअप्राणोह्यमनाश्चेतिप्राणादिवायुभेदाःकर्मेंद्रियाणितद्विषयास्तथाचबुद्धिमनसीबुद्धींद्रियाणितद्विषयाश्चप्रतिषिद्धावेदितव्याः॥तथाश्रुत्यंतरे॥ध्यायतीवलेलायतीवेति॥यस्माच्चैवंप्रतिषिद्धोपाधिद्वयस्तस्मात्शुभ्रःशुद्धोऽतो

अप्राणोह्यमनाःशुभ्रोऽक्षरात्परतःपरः॥२॥एतस्माज्जायतेप्राणो

ऽक्षरान्नामरूपबीजोपाधिलक्षितस्वरूपात्सर्वकार्यकारणबीजत्वेनोपलक्ष्यमाणत्वात्परंतदुपाधिलक्षणमव्याकृताख्यमक्षरंसर्वविकारेभ्यस्तस्मात्परतोऽक्षरात्परोनिरुपाधिकःपुरुषइत्यर्थः॥यस्मिंस्तदाकाशाख्यमक्षरंसंव्यवहारविषयंओतंप्रोतंच॥कथंपुनरप्राणादिमत्वंतस्येत्युच्यते॥यदिहिप्राणादयःप्रागुत्पत्तेःपुरुषइवस्वेनात्मनासंतितदापुरुषस्यप्राणादिनाविद्यमानेनप्राणादिमत्वंस्यान्नतुतेप्राणादयःप्रागुत्पत्तेःपुरुषइवस्वेनात्मनासंतितदातोऽप्राणादिमान्परःपुरुषः॥यथानुत्पन्नेपुत्रेऽपुत्रोदेवदत्तः॥ सर्वकार्येति॥

कार्यंह्यपरंप्रसिद्धंतत्कारणत्वेनगम्यमानत्वान्मायातत्वंपरंयौक्तिकबाधादनिर्वाच्यत्वेपिस्वरूपोच्छेदाभावादक्षरंतदुक्तंगीतायां॥क्षरःसर्वाणिभूतानिकूटस्थोऽक्षरउच्यते॥उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइतियदेवचैतन्यंनिरुपाधिशुद्धंअविकल्पंब्रह्मयत्तत्वज्ञानात्जीवानां

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰भा॰ १२ कैवल्यंतदेवमायाप्रतिबिंबितरूपेणकारणंभवतीत्याह॥एतस्माद्देवेति॥प्राणोस्यसेरूर्ध्वंतर्हिंसप्राणत्वंपरमात्मनोभविष्यतीतिशंकानिर टी॰
स्यर्थंश्रुसंतरसिद्धंप्राणस्यविशेषणमाह॥अविद्याविषयइतिनामधेयइतिवाङ्मात्रेोनवस्तुवृत्तइत्यर्थः॥प्राणादीनांपाठक्रमोयमर्थक्रमेण
बाध्यते॥गताःकलाःपंचदशप्रतिष्ठाइतिभूतेषुलयश्रवणेनप्राणानांभौतिकत्वावगमाद्भूतोत्पत्त्यनंतरंप्राणोत्पत्तिर्द्रष्टव्येति॥अभिमुखमाग
च्छन्वायुरावहःपुरतोगच्छन्प्रवहइत्यादिभेदः॥शब्दस्पर्शरूपरसगंधाउत्तरोत्तरस्यगुणायेषांतानितथोक्तानियथाशुक्लंतत्त्वस्यापन्नाद

कथंतेनसंतिप्राणादयइत्युच्यते॥यस्मादेतस्माद्देवपुरुषान्नामरूपबीजोपाधिलक्षिताज्जायतेउत्पद्यतेऽविद्याविषयविकारभूत
नामधेयोऽनृतात्मकःप्राणः॥वाचारंभणंविकारोनामधेयमनृतमितिश्रुसंतरात्॥नहितेनाविद्याविषयेणानृतेनप्राणेनसप्राणत्वंप

मनःसर्वेंद्रियाणिच॥खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणी॥३

रस्यस्याद्पुत्रस्यस्वप्नदृष्टेनेवपुत्रेणसपुत्रत्वं॥एवंमनःसर्वाणिचेंद्रियाणिविषयाश्चैतस्मादेवजायंतेतस्मात्सिद्धमस्यनिरुपचरितम
प्राणादिमत्त्वमित्यर्थः॥यथाचप्रागुत्पत्तेःपरमार्थतोऽसंतस्तथाप्रलीनाश्चेतिद्रष्टव्याः॥यथाकरणानिमनश्चेंद्रियाणितथाशरीरविषय
कारणानिभूतानि॥ नचविकारणाज्जायमानःपटःशुक्लगुणोजायतेतथाकाशावस्थापन्नाद्ब्रह्मणोजायमानोवायुराकाशगुणेनशब्देनान्वि
तोजायतेतथैववायुभावापन्नाद्ब्रह्मणोग्निस्तद्गुणेनान्वितोजायतइतिद्रष्टव्यं॥ननुसूक्ष्माणिभूतानिप्रथममुत्पद्यंते॥अनंतरंतासांत्रिवृतंत्रिवृत रमः
मेकैकामकरोदितिपंचीकरणोपलक्षणार्थत्रिवृत्करणश्रुतेःपंचात्मकत्वमवगम्यतेततएकैकस्यभूतस्यपंचगुणत्वंवर्णितमन्यत्रकथमिहपंची १२

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

कारणमनादृत्य प्रथमसर्गएवाकाशस्यैकगुणत्वं वायोर्द्विगुणत्वं तेजसस्त्रिगुणत्वमित्यादि उच्यते सत्यं भूतसर्गे तात्पर्याभावद्योतनाय प्रक्रियां
तरं न विरुध्यते। नह्येतत्प्रतिबद्धं किंचित्फलं श्रूयते। अतएव गुणगुणिभावोपि नवैशेषिकपक्षवदिह विवक्षितः किंतु राहोः शिर इतिवदुप

खमाकाशं वायुर्वातर्बाह्य आवहादिभेदो ज्योतिरग्निरापउदकं पृथिवी धरित्री विश्वस्य धारिणी॥ एतानि च शब्दस्पर्शरूपरसगंधोत्त
रोत्तरगुणानि पूर्वगुणसहितान्येतस्मादेव जायंते॥ संक्षेपतः परविद्याविषयमक्षरं निर्विशेषं पुरुषं सत्यं दिव्यो ह्यमूर्त इत्यादिना मंत्रे
णोक्त्वा पुनस्तदेव सविशेषं विस्तरेण वक्तव्यमिति प्रवर्तते संक्षेपविस्तरोक्तो हि पदार्थः सुखाभिगम्यो भवति॥ सूत्रभाष्योक्तवदिति॥ यो

अग्निर्मूर्द्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः॥ वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभू
तांतरात्मा॥४॥ तस्मादग्निः समिधो यस्य सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्यां॥ पि प्रथमजात्प्राणाद्धिरण्यगर्भाज्जायते ऽ ड्स्यां
तर्विराट् सतत्वांतरितत्वेन लक्ष्यमाणोप्येतस्मादेव पुरुषाज्जायत एतन्मयुक्षेत्येतदर्थमाह॥ तं च विशिनष्टि अग्निर्द्युलोकः॥ असौ वै
लोकोग्निरितिश्रुतेः॥ मूर्द्धा यस्योत्तमांगं शिरश्चक्षुषी चंद्रश्च सूर्यश्च चंद्रसूर्यौ यस्येति सर्वत्रानुषंगः कर्तव्यः॥ अस्येत्यस्य पदस्य वक्ष्यमा
णस्य यस्येति विपरिणामं कृत्वा दिशः श्रोत्रे यस्य वाग्विवृता उद्घाटिताः प्रसिद्धा वेदा यस्य॥ वायुः प्राणो यस्य हृदयमंतःकरणं विश्वं सम
स्तं जगदस्य यस्येत्येतत्सर्वं ह्यंतः देशमात्रं विस्तरेण तत्कार्यपर्यंतं तेन तेनाकारेण ब्रह्मैव विवर्तत इति प्रपंच्यते तत्तोतिरिक्तस्याणुमात्र
स्यासंभवात्तस्मिन्ज्ञाते सर्वं ज्ञातं भवतीति प्रदर्शनार्थमित्यर्थः॥ सर्वेषां भूतानामिति पंचमहाभूतानामंतरात्मा॥ स्थूलपंचभूतशरीरो हि विराडित्य

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं·भा· द्युपर्जन्यपुरुषपृथिवीयोषित्सुपंचस्वग्निदृष्टेःश्रुत्यंतरचोदितत्वात्तद्वारेणेत्यर्थः॥पंचभक्तिकमितिहिंकारप्रस्तावोद्गीथप्रतिहारनिध टी·
१४ करणविकारमेवजगन्मनस्येवसुषुप्तेप्रलयदर्शनाज्जागरितेपिततएवाग्निविस्फुलिंगवद्विप्रतिष्ठानाद्यस्यचपद्भ्यांजाताःपृथि
वीएषदेवोविष्णुरनंतःप्रथमशरीरीत्रैलोक्यदेहोपाधिःसर्वेषांभूतानामंतरात्मासहिसर्वभूतेषुद्रष्टाश्रोतामंताविज्ञातासर्वकार
णात्मा॥पंचाग्निद्वारेणचयाःसंसरंतिप्रजास्ताअपितस्मादेवपुरुषात्प्रजायंतइत्युच्यते॥तस्मात्पुरुषात्प्रजावस्थानविशेषरूपाग्निः
सविशिष्यते॥समिधोयस्यसूर्यःसमिधइवसमिधःसूर्येणहिद्युलोकःसमिध्यतेततोहिद्युलोकान्निष्पन्नात्सोमात्पर्जन्योद्वितीयो

पुमान्रेतःसिंचतियोषितायांबह्वीःप्रजाःपुरुषात्संप्रसूताः॥५॥तस्मादृचःसामयजूंषिदीक्षायज्ञाश्चसर्वेक्रतवोदक्षि
णाश्च॥संवत्सरश्चयजमानश्चलोकाःसोमोयत्रपवतेयत्रसूर्यः॥६॥

ग्निःसंभवतितस्माच्चपर्जन्यादोषधयःपृथिव्यांसंभवंत्योष
धिभ्यःपुरुषाग्नौहुताभ्यउपादानभूताभ्यःपुमानग्नौरेतःसिंचतियोषितायांयोषितियोषाग्नौस्त्रियामित्येवंक्रमेणबह्वीःबह्व्यःप्रजाः
ब्राह्मणाद्याःपुरुषात्परस्मात्संप्रसूताःसमुत्पन्नाः॥किंच॥कर्मसाधनानिफलानिचतस्मादेवेत्याहकथंतस्मात्पुरुषादृचोनियताक्षरपा
दावसानागायत्र्यादिछंदोविशिष्टामंत्राःसामपांचभक्तिकंसाप्तभक्तिकंचस्तोभादिगीतविशिष्टंयजूंषिअनियतपादाक्षरावसानानिवा
क्यरूपाणिएवंत्रिविधामंत्रादीक्षामौंज्यादिलक्षणाकर्तृनियमविशेषायज्ञाश्चसर्वेऽग्निहोत्रादयःक्रतवःसयूपाःदक्षिणाश्चएकगवाद्या रामः
नाख्याःपंचभक्तयोवयवायस्यतत्तथोक्तं॥साप्तभक्तिकमितिहिंकारःप्रस्तावआदिःउद्गीथप्रतिहारउपद्रवनिधानाख्याःसप्तभक्तयोयस्यतत्तथोक्तं १४

विश्वजित्सर्वमेधयोः सर्वस्वदक्षिणा अतएकां गामारभ्य सर्वस्वांता दक्षिणा भवंतीत्यर्थः॥ तपश्च कर्मांगमिति पयोव्रतं ब्राह्मणस्य यवागू राजन्य

संवत्सरः कालः कर्मांगो यजमानश्च कर्ता लोकास्तस्य कर्मफलभूताः ते विशेष्यंते॥ सोमो यत्र येषु लोकेषु पवते पुनाति लोकान्यत्र येषु
सूर्यस्तपति च ते च दक्षिणायनोत्तरायणमार्गद्वयगम्याः विद्वदविद्वत्कर्तृफलभूताः॥ तस्माच्च पुरुषात्कर्मांगभूता देवा बहुधा वस्वादिगण
भेदेन संप्रसूताः सम्यक्प्रसूताः साध्या देवविशेषा मनुष्याः कर्माधिकृताः पशवो ग्राम्यारण्या वयांसि पक्षिणः॥ जीवनं च मनुष्यादीनां॥
प्राणापानौ व्रीहियवौ हविरर्थौ तपश्च कर्मांगं पुरुषसंस्कारलक्षणं स्वतंत्रं च फलसाधनं श्रद्धा यत्पूर्वकः सर्वपुरुषार्थसाधनप्रयोगः चि

तस्माच्च देवा बहुधा संप्रसूताः साध्या मनुष्याः पशवो वयांसि॥ प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च॥ सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः सप्त होमाः॥ सप्त इमे लोका येषु चरंति प्राणा गुहाशया निहिताः सप्त सप्त

त्तप्रसाद आस्तिक्यबुद्धिस्तथा सत्यमनृतवर्जनं यथाभूतार्थवचनं वा ऽपीडाकरं ब्रह्मचर्यं मैथुनाऽसमाचारो विधिश्चेतिकर्तव्यता॥ किं
च॥ सप्त शीर्षण्याः प्राणास्तस्मादेव पुरुषात्प्रभवंति॥ तेषां च सप्तार्चिषो दीप्तयः स्वविषयावद्योतनानि तथा सप्त समिधः सप्त विषयाः वि
षयैर्हि समिध्यंते प्राणाः सप्त होमास्तद्विषयविज्ञानानि॥ यदस्य विज्ञानं तज्जुहोतीति श्रुत्यंतरात्॥ किं च॥ सप्त इमे लोका इंद्रियस्थानानि
येषु चरंति संचरंति प्राणाः प्राणा येषु चरंतीति प्राणानां विशेषणमिदं प्राणापानादिनिवृत्त्यर्थं॥ स्वामिसाद्वैश्यस्येत्यादिविहितं स्वतंत्रं कुर्वा
द्रायणादीत्यर्थः॥ आत्मयाजिनामिति सकलमिदमहं च परमात्मैवेति भावनापूर्वकं परमेश्वराराधनबुध्या ये यजंति तेषामित्यर्थः यत एकस्मिन्नुभग

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

वोविज्ञातेसर्वमिदंविज्ञातंभवतीतितन्निरूपितंसर्वमिदंपरमात्मनोजायतेअतस्तावन्मात्रंसर्वंतस्मिन्विज्ञातेविज्ञातंभवतीतिअविद्यास्व

गुहायांशरीरेहृदयेवास्वापकालेशेरतइतिगुहाशयाः निहिताःस्थापिताधात्रासप्तसप्तप्रतिप्राणिभेदंयानिचात्मयाजिनांविदुषांक र्माणिकर्मफलानिचाविदुषांचकर्माणितत्साधनानितत्फलानिचसर्वंचैतन्यात्परस्मादेवपुरुषात्सर्वज्ञात्प्रसूयतइतिप्रकरणार्थः॥अ तःपुरुषात्समुद्राःक्षाराद्यागिरयश्चहिमवदादयोयस्मादेवस्यंदंतेस्रवंतिगंगाद्याःसिंधवोनद्यःसर्वरूपाःबहुरूपाअस्मादेवचपुरुषा त्सर्वाओषधयोव्रीहियवाद्यारसश्चमधुरादिःषड्विधोयेनरसेनभूतैःपंचभिःस्थूलैःपरिवेष्टितस्तिष्ठतेतिष्ठतिह्यंतरात्मालिंगसूक्ष्मशरी रंतदंतरालेशरीरस्यात्मनश्चात्मवद्वर्ततइत्यंतरात्मा॥एवंपुरुषात्सर्वमिदंसंप्रसूतंअतोवाचारंभणंविकारोनामधेयमनृतंपुरुषइत्येव

अतःसमुद्रागिरयश्चसर्वेऽस्मात्स्यंदंतेसिंधवःसर्वरूपाः॥अतश्चसर्वाओषधयोरसश्चयेनैषभूतैस्तिष्ठतेह्यंतरात्मा ९
॥पुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतं॥एतद्योवेदनिहितंगुहायांसोऽविद्याग्रंथिंविकिरतीहसोम्य १०॥३॥ सत्यं॥अतःपु

रुषएवेदंविश्वंसर्वं॥नविश्वंनामपुरुषादन्यत्किंचिदस्तिअतोयदुक्तंतदेतदभिहितंकस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीत्येत स्मिन्परस्मिन्नात्मनिसर्वकारणेपुरुषेविज्ञातेपुरुषएवेदंविश्वंनान्यदस्तीतिविज्ञातंभवतीतिकिंपुनरिदंविश्वमित्युच्यते॥कर्माग्निहोत्रादि लक्षणंतपोज्ञानंतत्कृतंफलमन्यदेतावद्धीदंसर्वंतच्चैतद्ब्रह्मणःकार्यंतस्मात्सर्वंब्रह्मपरामृतंपरममृतमहमेवेतियोवेदनिहितंस्थितंगुहायां हृदिसर्वप्राणिनांसएवंविज्ञानादविद्याग्रंथिंग्रंथिमिवदृढीभूतामविद्यावासनांसविकिरतिविक्षिपतिविनाशयतीहजीवन्नेवनमृतःसन्हेसोम्य

अधुनायस्यसकृदुपदेशमात्रेणाद्वितीयंब्रह्मास्मीतिवाक्यार्थज्ञानंनभवतितस्योपायानुष्ठानेनभवितव्यमित्यभिप्रेत्याह॥ अरूपंसदसरमिति॥ वाक्यार्थस्यैवपुनःपुनर्भावनायुक्त्यनुसंधानंचोपायइत्याह॥ उच्यतइति॥ आविःशब्दोनिपातःप्रकाशवाचीब्रह्मविश्वोपलब्ध्यात्मनाप्रकाशमानमेवसदेतिभावयेदित्यर्थः॥ अन्यैरप्युक्तं॥ यदस्तियद्भातितदात्मरूपंनान्यत्ततोभातिनचान्यदस्ति॥ स्वभावसंवित्प्रतिभातिकेवल

अरूपंसदसरंकेनप्रकारेणविज्ञेयमित्युच्यते॥ आविःप्रकाशंसन्निहितंवागाद्युपाधिभिः॥ ज्वलतिभ्राजतीतिश्रुयंतरात्शब्दादीनुपलभमानवद्भासते॥ दर्शनश्रवणमननविज्ञानाद्युपाधिधर्मैराविर्भूतंसल्लक्ष्यतेहृदिसर्वप्राणिनांहृदयेतदाविर्ब्रह्मसन्निहितंसम्यक्स्थितंहृदितद्गुहाचरन्नामगुहायांचरतीतिदर्शनश्रवणादिप्रकारैर्गुहाचरमितिप्रख्यातं॥ महत्सर्वमहत्वात्पदंपद्यतेसर्वेणेतिसर्वपदा

आविःसन्निहितंगुहाचरन्नाम महत्पदमत्रैतत्समर्पितं॥ एजत्प्राणन्निमिषच्चयदेतज्जानथसदसद्वरेण्यं॥

र्थास्पदत्वात्कथंतन्महत्पदमित्युच्यते॥ यतोत्रास्मिन्ब्रह्मण्येतत्सर्वंसमर्पितंसंप्रवेशितंरथनाभाविवाऽराएजच्चलत्पक्ष्यादिप्राणत्प्राणतीतिप्राणापानादिमत्मनुष्यपश्वादिनिमिषच्चयन्निमेषादिक्रियावद्यच्चानिमिषच्चशब्दात्समस्तमेतदत्रैवब्रह्मणिसमर्पितं॥ एतद्यदास्पदंसर्वंजानथहेशिष्याअवगच्छथतदात्मभूतंभवतांसदसत्स्वरूपंसदसतोर्मूर्तो ग्राह्यंगृहीतेतिमृषैवकल्पनेति॥ सन्निहितमितिसर्वेषांप्राणिनांहृदयेस्थितंवागाद्युपाधिभिःशब्दादीनुपलभमानवत्ब्रह्मैवजीवभावमापन्नमवभासतेततःस्वतोअपरोक्षंचेतिसदास्मरेदित्यर्थः॥ सर्वमिदंकार्यंपरिच्छिन्नंचसास्परंकार्यत्वात्परिच्छिन्नत्वाच्चघटादिवत्ततःसर्वास्पदंयत्तदेवमायास्पदमात्मभूतमितियुक्त्यानुसंधान

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰भा॰ घटादिवदादित्यादेर्जडत्वेपि यद्दीप्तिमत्त्वं वैचित्र्यं तदनुपपत्त्यापि तत्कारणं संभावनीयमित्याह॥ किंच यदर्चिमदिति॥ अर्चिमत्त्वादादित्यादिवदिंद्रि टी॰
१६ यग्राह्यत्वं प्राप्तं निषेधति॥ यदणुभ्य इति॥ परमाणुपरिमाणत्वं तर्हि स्यादिति नाशंकनीयमित्याह॥ चशब्दादिति॥ स्थूलत्वात्तर्हि अन्याधारं स्यादि

॰मूर्तयोः स्थूलसूक्ष्मयोस्तद्व्यतिरेकेणाभावात्॥ वरेण्यं वरणीयं तदेव हि सर्वस्य नित्यत्वात्प्रार्थनीयं परं व्यतिरिक्तं विज्ञानात्प्रजानामिति व्य
वहितेन संबंधः यल्लौकिकविज्ञानागोचरमित्यर्थः॥ यद्वरिष्ठं वरतमं सर्वपदार्थेषु वरेषु तद्ध्येकं ब्रह्मातिशयेन वरं सर्वदोषरहितत्वात्॥
किंच यदर्चिमद्दीप्तिमत्तद्दीप्त्या ह्यादित्यादि दीप्यत इति दीप्तिमद्ब्रह्म॥ किंच यदणुभ्यः श्यामाकादिभ्योप्यणु च सूक्ष्मं॥ चशब्दात्स्थूलेभ्योप्य

परं विज्ञानाद्यद्वरिष्ठं प्रजानां॥१॥ यदर्चिमत् यदणुभ्योणु च॥ यस्मिँल्लोका निहिता लोकिनश्च तदेतदक्षरं ब्रह्म स प्राण
स्तदु वाग्मनः॥ तदेतत्सत्यं तदमृतं तद्वेद्धव्यं सोम्य विद्धि॥२॥

तिशयेन स्थूलं पृथिव्यादिभ्यो यस्मिँल्लोका भूरादयो निहिताः
स्थिता ये च लोकिनो लोकनिवासिनो मनुष्यादयश्चैतन्याश्रया हि सर्वे प्रसिद्धाः॥ तदेतत्सर्वाश्रयमक्षरं ब्रह्म स प्राणस्तदु वाक्च म
नश्च सर्वाणि च करणानि तदु अंतश्चैतन्यं चैतन्याश्रयो हि प्राणेंद्रियादिसर्वसंघातः॥ प्राणस्य प्राणमिति श्रुत्यंतरात्॥ यत्प्राणादीनामंत
श्चैतन्यमक्षरं तदेतत्सत्यमवितथमतोऽमृतमविनाशि तद्वेद्धव्यं मनसा ताडयितव्यं तस्मिन्मनःसमाधानं कर्तव्यमित्यर्थः॥ यस्मादे
वं हे सोम्य विद्धि अक्षरे चेतः समाधत्स्व॥

तिनाशंकनीयमित्याह॥ यस्मिँल्लोका इति॥ प्राणादिप्रवृत्तिश्चैतनाधिष्ठाननिबंधना जडप्र रामः
वृत्तित्वाद्रथादिप्रवृत्तिवच्चिद्भेदे च प्रमाणाभावादेकचैतन्यमात्रमस्मीति विचारयेदित्याह॥ तदेतत्सर्वाश्रयमिति ॥ ७ ॥ ७ ॥ १६

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

प्राणाद्यधिष्ठानत्वात्प्राणादिलक्ष्यआत्माद्रष्टव्योविचारासमर्थस्यप्रणवमवलंब्यब्रह्मात्मैकत्वेचित्तसमाधानंक्रममुक्तिफलंदर्शयितुमुपक्रम

कथंवेद्धव्यमित्युच्यते॥धनुरिष्वासनंगृहीत्वाऽदायऔपनिषदमुपनिषत्सुभवंप्रसिद्धंमहास्त्रंमहच्चतदस्त्रंचमहास्त्रंधनुस्तस्मि
न्शरंकिंविशिष्टमित्याह॥उपासानिशितंसंतताभिध्यानेनतनूकृतंसंस्कृतमित्येतत्संधयीतसंधानंकुर्यात्संधायचायम्याकृष्यसेंद्रि
यमंतःकरणंस्वविषयाद्विनिवर्त्यलक्ष्यएवावर्जितंकृत्वेत्यर्थः॥नहिहस्तेनेवधनुषआयमनमिहसंभवतितद्भावगतेनतस्मिन्ब्र
ह्मण्यक्षरेलक्ष्येभावनाभावस्तद्गतेनचेतसालक्ष्यंतदेवयथोक्तलक्षणमक्षरंसोम्यविद्धियदुक्तंधनुरादितदुच्यते॥प्रणवॐका

धनुर्गृहीत्वौपनिषदंमहास्त्रंशरंह्युपासानिशितंसंधयीत॥आयम्यतद्भावगतेनचेतसालक्ष्यंतदेवाक्षरंसोम्य
विद्धि॥२॥प्रणवोधनुःशरोह्यात्माब्रह्मतल्लक्ष्यमुच्यते॥

रःधनुर्यथेष्वासनंलक्ष्येशरस्यप्रवेशकारणंतथाऽऽत्मशरस्याक्षरेलक्ष्येप्रवे
शकारणमोंकारःप्रणवेनह्यभ्यस्यमानेनसंस्क्रियमाणस्तदालंबनोऽप्रतिबंधेनाक्षरेऽवतिष्ठतेयथाधनुषास्तइषुर्लक्ष्येऽतःप्रणवो
धनुरिवधनुःशरोह्यात्मोपाधिलक्षणःपरएवजलेसूर्यादिवदिहप्रविष्टोदेहेसर्वबौद्धप्रत्ययसाक्षितयासशरइवस्वात्मन्येवार्पितोक्ष
रेब्रह्मण्यतोब्रह्मतल्लक्ष्यमुच्यतेलक्ष्यइवमनःसमाधित्सुभिरात्मभावेनलक्ष्यमाणत्वात्॥तत्रैवंसत्यप्रमत्तेनबाह्यविषयोपलब्धितृष्णा
प्रमादवर्जितेनसर्वतोविरक्तेनजितेंद्रियेणैकाग्रचित्तेनवेद्धव्यंब्रह्मलक्ष्यंततस्तद्वेधनादूर्ध्वंशरवत्तन्मयोभवेत्॥ ते॥कथंवेद्धव्यमित्यादिना॥

प्रणवोब्रह्मेत्यभिध्यायतउपसंहतकरणग्रामस्यप्रणवोपरक्तंयच्चैतन्यप्रतिबिंबंस्फुरतिसआत्मेत्यत्रसंधानंप्रणवेशरसंधानंतस्यचित्प्रतिबिंबस्यबिंबे

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰भा॰ उत्तरग्रंथस्य पौनरुक्त्यं परिहरति॥ अक्षरस्यैव दुर्लक्ष्यत्वादिति॥ ससाधनं सर्वं कर्म परित्यज्य आत्मैव ज्ञातव्य इत्यत्रैव हेतुमाह॥ अमृतस्येति॥ ध टी॰
१७ नुर्वाआयुधेन लक्ष्यतइति तल्लक्षण आत्मैकत्वसाक्षात्कार इत्यर्थः॥ कर्मसंगिजनसंगत्याकर्मश्रद्धाविषयश्रद्धा च वाक्यार्थज्ञानस्यावगमाय प्रति

यथा शरस्य लक्ष्यैकात्मत्वं फलं भवति तथा देहाद्यात्मप्रत्ययतिरस्करणेनाक्षरैकात्मत्वं फलमापादयेदित्यर्थः॥ अक्षरस्यैव दुर्लक्ष्यत्वा
त्पुनःपुनर्वचनं सुलक्षणार्थं॥ यस्मिन्नक्षरे पुरुषे द्यौः पृथिवी चांतरिक्षं चोतं समर्पितं मनश्च सह प्राणैः करणैरन्यैः सर्वैः॥ तमेव सर्वाश्रयमे
कमद्वितीयं जानथ जानीथ हे शिष्याः आत्मानं प्रत्यक्स्वरूपं युष्माकं सर्वप्राणिनां च ज्ञात्वा चान्यावाचोऽपरविद्यारूपा विमुंचथ विमुंचत परित्यजत
तत्प्रकाश्यं च सर्वं कर्म ससाधनं यतोऽमृतस्यैष सेतुरेतदात्मज्ञानममृतस्यामृतत्वस्य मोक्षस्य प्राप्तये सेतुरिव सेतुः संसारमहोदधेरुत्त

अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्॥४॥ यस्मिन्द्यौः पृथिवी चांतरिक्षमोतं मनः सह प्राणैश्च सर्वैः॥ तमेवैकं जानथ आ
त्मानमन्या वाचो विमुंचथामृतस्यैष सेतुः॥५॥ अरा इव रथनाभौ संहता यत्र नाड्यः॥ रणहेतुत्वात्॥ तथा च श्रुत्यंतरं॥ तमेव वि
दित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति॥ किंच अरा इव यथा रथनाभौ समर्पिता अरा एवं संहताः संप्रविष्टा यत्र यस्मिन्हृद
ये सर्वतो देहव्यापिन्यो नाड्यः तस्मिन्हृदये बुद्धिप्रत्ययसाक्षिभूतः स एष प्रकृत आत्माऽन्तर्मध्ये चरते चरतिवर्तते॥ पश्यन्शृण्वन्
मन्वानो विजानन्नू बहुधा क्रोधहर्षादिप्रत्ययैर्जायमान इव जायमानोंतःकरणोपाध्यनुविधायित्वाद्वदंति लौकिकाः हृष्टो जातः क्रुद्धो
जातइति॥ बंधको विघ्नः समाभूदित्याशंसनं नत्ववाक्यार्थावगतौ निष्पन्नायां फलप्राप्तेर्विघ्नशंकास्तीत्यभिप्रेत्याह॥ परस्तादिति॥ मद्रुपदे

॥ मुंडकोपनिषद्भाष्यम्॥ १७

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

सर्वेश्वरत्वमनोमयत्वादिगुणविशिष्टब्रह्मणोहृदयपुंडरीकेध्यानंचक्रममुक्तिफलमंदब्रह्मविदोविधीयतइतिदर्शयितुमाह॥ योसौतम

त्वमात्मानमोमित्येवमोंकारालंबनाःसंतोयथोक्तकल्पनयाध्यायथचिंतयतउक्तंवक्तव्यंचशिष्येभ्यआचार्येणजानता॥ शिष्या
श्चब्रह्मविद्याविविदिषुत्वान्निवृत्तकर्माणोमोक्षपथेप्रवृत्तास्तेषांनिर्विघ्नतयाब्रह्मप्राप्तिमाशास्त्याचार्यः॥ स्वस्तिनिर्विघ्नमस्तु
वोयुष्माकंपरायपरकूलायपरस्तात्कस्मात्अविद्यातमसःअविद्यारहितब्रह्मात्मस्वरूपगमनायेत्यर्थः॥ योसौतमसःपरस्तात्संसार
महोदधिंतीर्त्वागंतव्यःपरविद्याविषयः॥ सकस्मिन्वर्ततइत्याह॥ यःसर्वज्ञःसर्ववित्व्याख्यातस्तंपुनर्विशिनष्टि॥ यस्यैषप्रसिद्धोमहि
माविभूतिःकोसौमहिमायस्येमेद्यावापृथिव्यौशासनेविधृतेतिष्ठतः॥ सूर्याचंद्रमसौयस्यशासनेऽलातचक्रवदजस्रंभ्रमतःयस्यशास

सएषोंतश्चरतेबहुधाजायमानः॥ ॐमित्येवंध्यायथआत्मानंस्वस्तिवःपरायतमसःपरस्तात्॥ यःसर्वज्ञःसर्ववि
द्यस्यैषमहिमाभुवि॥ दिव्येब्रह्मपुरेह्येषव्योम्न्यात्माप्रतिष्ठितः॥ मनोमयःप्राणशरीरनेताप्रतिष्ठितोन्नेहृदयंसन्नि
धाय॥

नेसरितःसागराश्चस्वगोचरंनातिक्रामंति॥ तथास्थावरजंगमंचयस्यप्रशासनेननियतं॥ तथर्तवोऽयनेऽब्दाश्चयस्यशासनं
नातिक्रामंति॥ तथाकर्तारःकर्माणिफलंचयच्छासनात्स्वंस्वंकालंनातिवर्ततेसएवमहिमाभुविलोकेयस्यसएषसर्वज्ञःएवंमहिमा
देवः॥ दिव्येद्योतनवतिसर्वबौद्धप्रत्ययकृतद्योतनेब्रह्मपुरेब्रह्मणोत्रचैतन्यस्वरूपेणनित्याभिव्यक्तत्वाद्ब्रह्मणःपुरंहृदयपुंडरीकंत
स्मिन्यद्व्योमतस्मिन्व्योम्न्याकाशेपुंडरीकमध्यस्थेप्रतिष्ठितइवउपलभ्यते॥ सःपरस्तादित्यादिना॥ छ॥ छ॥ छ॥ छ।

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

अस्य परमात्मज्ञानस्येति जीवन्मुक्तिफलस्याद्वैतवाक्यार्थावगमस्य क्रममुक्तिफलस्य चोपासनस्येत्यर्थः। अविद्यावासनाप्रचयो भिद्यत टी.
इति कोऽर्थः। किं बुद्धौ विद्यमानायामविद्यादिभेदो ज्ञानफलं किं वा तन्निवृत्तौ नाद्यः सत्युपादाने कार्यस्यात्यंतोच्छेदासंभवात्॥ न द्वितीयः ज्ञा

न ह्याकाशवत्सर्वगतस्य गतिरागतिः प्रतिष्ठा वान्यथा संभवति॥ स ह्यात्मा तत्रस्थो मनोवृत्तिभिरेव विभाव्यत इति मनोमयो म
नउपाधित्वात्प्राणशरीरनेता प्राणश्च शरीरं च प्राणशरीरं तस्यायं नेता स्थूलाच्छरीराच्छरीरांतरं प्रति प्रतिष्ठितोऽवस्थितोऽन्ने
भुज्यमानान्नविपरिणामे प्रतिदिनमुपचीयमानेऽपचीयमाने च पिंडरूपेऽन्ने हृदयं बुद्धिं पुंडरीकच्छिद्रे सन्निधाय समवस्थाप्य
हृदयावस्थानमेव ह्यात्मनः स्थितिर्न ह्यात्मनः स्थितिरन्ने॥ तदात्मतत्त्वं विज्ञानेन विशिष्टेन शास्त्राचार्योपदेशजनितेन ज्ञानेन श

तद्विज्ञानेन परिपश्यंति धीरा आनंदरूपममृतं यद्विभाति॥ १ ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥

मदमध्यानसर्वत्यागवैराग्योद्भूतेन परिपश्यंति सर्वतः पूर्णं पश्यंति उपलभंते धीरा विवेकिनः आनंदरूपं सर्वानर्थदुःखायासप्र
हीणं अमृतं यद्विभाति विशेषेण स्वात्मन्येव भाति सर्वदा॥ अस्य परमात्मज्ञानस्य फलमिदमभिधीयते॥ भिद्यते हृदयग्रंथिः॥ अवि
द्यावासनाप्रचयो बुद्ध्याश्रयः कामः॥ कामा येऽस्य हृदि श्रिता इति श्रुत्यंतरात्॥ हृदयाश्रयोऽसौ नात्माश्रयः॥ भिद्यते भेदं विनाशमा
याति॥ छिद्यंते सर्वज्ञेयविषयाः संशयाः लौकिकानामामरणात् गंगास्रोतोवत्प्रवृत्ता विच्छेदमायांति॥ नस्याज्ञानेनैव साक्षाद्विरोधप्र रा.ना:
सिद्धेः किं च बुद्धिरप्यनादिः सादिर्वा नाद्यः॥ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि चेति श्रुतिविरोधात्॥ ७ ॥ ७ ॥ क ॥ ७ ॥ १८

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

नाऽस्यः प्रलये ब्रह्मज्ञानं विनैव बुद्धेर्नाशसंभवात्तदानर्थक्यप्रसंगात्तस्मादित्वेच बुद्धेरुपादानं साक्षात्ब्रह्म चेत्तन्नाशं विनास्य नोच्छेदो न स्यान्मा याचेत्तद्दृष्टृगतज्ञानेन नोच्छेदमर्हति लौकिकमायाविगतमायायाद्दृष्टृगतज्ञानेनोच्छेदादर्शनात्किंच बुद्धेरुच्छेदो न तस्याः फलं स्वनाशस्या फलत्वान्नात्मनस्तस्य बुद्धिप्रसंगाभावेन तदुच्छेदस्याफलत्वात्किंचात्मनोऽविद्याघनाश्रयत्वाभिधानं श्रुतिविरुद्धं प्रक्रमे अविद्यायामन्तरेव र्तमाना इति श्रवणादुपसंहारे च अनीशया शोचति मुह्यमान इति श्रवणात् बुद्धिगतमेवाविद्याद्यात्मन्यध्यस्यत इति चेत् अध्यस्यत इति को र्थः॥ निक्षिप्यते भासते दृश्यते वा नाद्यः॥ अन्यधर्मस्यान्यत्र निक्षेपासंभवात् भासते चेत्केन दृश्यते॥ न तावदात्मना तस्याविद्याश्रयत्वानंगीकारा

अस्य च छिन्नसंशयस्य निवृत्ताविद्यस्य यानि ज्ञानोत्पत्तेः प्राक्तनानि जन्मांतरे चाऽप्रवृत्तफलानि ज्ञानोत्पत्तिसहभावीनि च क्षीयंते

क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ५।

कर्माणि न त्वेतज्जन्मारंभकाणि प्रवृत्तफलत्वात्तस्मिन्सर्वज्ञेऽसंसारिणि परावरे परं च कारणात्मनाऽवरं च कार्यात्मना तस्मिन्परावरे साक्षादहमस्मीति दृष्टे संसारकारणोच्छेदान्मुच्यत इत्यर्थः॥ ननु बुद्ध्या बुद्धेरात्मविषयत्वासंभवेन तद्गतदर्शनासंभवात्तद्गतेश्च स्वाश्रय गतेन तत्त्वानुभवेन निवर्त्यत्वे प्रसिद्धे बुद्धेरनुभवाश्रयत्वप्रसंगात्तस्मान्नास्य भाष्यस्य सम्यगर्थं पश्याम इति चेदुच्यते चित्तं त्वानादिरनिर्वाच्याऽवि द्याचैतन्यमवच्छिद्यत्वावच्छिन्नचैतन्यस्य बुध्यादितादात्म्यरूपेण विवर्तते तस्याश्च ब्रह्मात्मतासाक्षात्कारनिवर्त्यरूपांगीकारात्तन्निवृत्तौ तदुत्थ हृदयग्रंथिभेदः श्रुत्योच्यते याष्यकारीयं च बुद्ध्याश्रयत्वाभिधानमहंकारविशेषणत्वेनाविद्यादेर्व्यावहारिकाभिप्रायेणात्मनाश्रयत्वाभिधानं चा

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

 भातीतिणिजंतार्थोध्याहारेणव्याख्यानंतस्यभासासर्वमिदंविभातीत्यस्यब्रह्मणःस्वतोभारूपत्वेतात्पर्यंकथयति॥यतएवंद्वेवब्रह्मभातिचेति॥

उक्तस्यैवार्थस्यसंक्षेपाभिधायकाउत्तरमंत्रास्त्रयोपि॥हिरण्मयेज्योतिर्मयेबुद्धिविज्ञानप्रकाशेपरेकोशेकोशइवासेरात्मस्वरूपोप
लब्धिस्थानत्वात्परंतत्सर्वाभ्यंतरत्वात्तस्मिन्विरजमविद्याद्यशेषरजोमलवर्जितंब्रह्मसर्वमहत्वात्सर्वात्मत्वाच्च॥निष्कलं॥निर्गताःक
लायस्मात्तंनिष्कलंनिरवयवमित्यर्थः॥यस्माद्विरजंनिष्कलंचातस्तच्छुभ्रंशुद्धंज्योतिषांसर्वप्रकाशात्मनामग्न्यादीनामपितज्ज्योतिर
वभासकमग्न्यादीनामपिज्योतिष्ट्वमंतर्गतब्रह्मात्मचैतन्यज्योतिर्निमित्तमित्यर्थः॥तद्धिपरंज्योतिर्यदन्यानवभास्यमात्मज्योतिस्तद्य
दात्मविद्आत्मानंस्वशब्दादिविषयबुद्धिप्रत्ययसाक्षिणंयेविवेकिनोविदुर्जानंतितआत्मविदस्तद्विदुरात्मप्रत्ययानुसारिणःय

हिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलं॥तच्छुभ्रंज्योतिषांज्योतिस्तद्यदात्मविदोविदुः॥९ नतत्रसूर्योभातिनचंद्रतार
कंनेमाविद्युतोभांतिकुतोयमग्निः॥तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति॥१०॥ स्मात्परंज्योतिस्तस्मात्तए
वतद्विदुःनेतरेबाह्यार्थप्रत्ययानुसारिणः॥कथंतज्ज्योतिषांज्योतिरित्युच्यते॥नतत्रतस्मिन्स्वात्मभूतेब्रह्मणिसर्वावभासकोपिसू
र्योभातितद्ब्रह्मनप्रकाशयतीत्यर्थः॥सहितस्यैवभासासर्वमन्यदनात्मजातंप्रकाशयतिनतुतस्यस्वतःप्रकाशनसामर्थ्यं॥तथानचंद्र
तारकंनेमाविद्युतोभांतिकुतोयमग्निःअस्मद्गोचरः॥किंबहुनायदिदंजगद्भातितमेवपरमेश्वरंस्वतोभारूपत्वाद्भांतंदीप्यमानमनुभा
त्यनुदीप्यतेयथाजलोल्मुकादिअग्निसंयोगाद्ग्निंदहंतमनुदहतिनस्वतः॥तद्वत्तस्यैवभासादीप्त्यासर्वमिदंसूर्यादिजगद्विभाति

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

उपसंहारमंत्रस्यतात्पर्यमाह॥ यत्तज्ज्योतिषांज्योतिस्तेनब्रह्मणाविविधंक्रियतइतितद्विकारंसर्वंजगत्सर्वंब्रह्मैवेतिबाधायांसामानाधिकरण्यं

यतएवंतदेवब्रह्मभातिचविभातिचकार्यगतेनविविधेनभासा अतस्तस्यब्रह्मणोभारूपत्वंस्वतोवगम्यते नहिस्वतोऽविद्यमानंभा
सनमन्यस्यकर्तुंशक्नोतिघटादीनामन्यावभासकत्वादर्शनात्॥ भारूपाणांचादित्यादीनांतद्दर्शनाद्यत्तज्ज्योतिषांज्योतिर्ब्रह्मतदेवस
त्यंसर्वंतद्विकारं॥ वाचारंभणंविकारोनामधेयमात्रमनृतमितरदित्येतमर्थंविस्तरेणहेतुतःप्रतिपादितंनिगमस्थानीयेनमंत्रेणपुन
रुपसंहरति॥ ब्रह्मैवोक्तलक्षणमिदंयत्पुरस्तादग्रेऽब्रह्मैवाविद्यादृष्टीनांप्रत्यवभासमानंतथापश्चाद्ब्रह्मतथादक्षिणतश्चतथोत्तरेण

ब्रह्मैवेदममृतंपुरस्ताद्ब्रह्मपश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण॥ अधश्चोर्ध्वंचप्रसृतंब्रह्मैवेदंविश्वमिदंवरिष्ठं॥११॥ इति
द्वितीयमुंडकं॥२॥

तथैवाधस्तादूर्ध्वंचसर्वतोऽन्यदिवकार्याकारेणप्रसृतंप्रगतंनामरूपवदवभासमानंकिंबहुनाब्रह्मै
वेदंविश्वंसमस्तमिदंजगद्वरिष्ठंवरतमं अब्रह्मप्रत्ययःसर्वोविद्यामात्रोरज्ज्वामिवसर्पप्रत्ययोब्रह्मैवैकंपरमार्थसत्यमितिवेदा
नुशासनं॥ इतिद्वितीयमुंडकं॥२॥ पराविद्योक्तायया तदक्षरंपुरुषाख्यंसत्यमधिगम्यते यदधिगमेहृदयग्रंथ्यादिसंसारकारण
स्यात्यंतिकविनाशःस्यात्तद्दर्शनोपायश्चयोगोधनुराद्युपादानकल्पनयोक्तः॥ अथेदानींतत्सहकारीणिसत्यादिसाधनानिवक्तव्या
नीतितदर्थमुत्तरआरंभः॥

योयंस्थाणुःपुमानसावितिवदन्वयव्यतिरेकाभावपरिहारेणतावन्मात्रत्वेबोध्यते॥ द्वितीयमुंडकं॥२॥ प्राधान्ये
नेत्यपूर्वत्वेनतात्पर्यविषयतयेत्यर्थः॥ द्वासुपर्णेत्यादौद्विवचनस्याकारश्छांदसः॥ जीवस्याज्ञत्वेननियम्यत्वेनयोग्यत्वादीश्वरस्यसर्वज्ञत्वेननिया

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं·भा· मकत्वशक्तियोगाच्छोभनमुचितंनियम्यनियामकभावगमनंययोस्तौशोभनपतनौपक्षिसामान्याद्वेतिवृक्षाश्रयणादिश्रवणादित्यर्थः॥ टी·
२० ऊर्ध्वमुत्कृष्टंब्रह्ममूलमधिष्ठानमस्येत्यूर्ध्वमूलःअवाञ्चःप्राणादयःशाखाइवास्येत्यवाक्शाखः॥श्वःस्थानंनियंतुमस्यनशक्यमितिअश्वत्थं

प्राधान्येनतत्वनिर्धारणंचप्रकारांतरेणक्रियते।संतद्दुःखगाह्यत्वात्कृतमपितत्रसूत्रभूतोमंत्रःपरमार्थवस्त्ववधारणार्थमुप
न्यस्यते॥द्वासुपर्णाद्वौसुपर्णौशोभनपतनौसुपर्णौपक्षिसामान्याद्वासुपर्णौसयुजासयुजौसहैवसर्वदायुक्तौसखायासखायौसमाना
ख्यानौसमानाभिव्यक्तिकारणावेवंभूतौसंतौसमानमविशेषमुपलब्ध्यधिष्ठानतयैकंवृक्षमिवोच्छेदसामान्याच्छरीरंवृक्षंपरिषस्व वृक्षं
जातेपरिष्वक्तवंतौसुपर्णाविवैकंवृक्षंफलोपभोगार्थमयंहिवृक्षउर्ध्वमूलोऽवाक्शाखोऽश्वत्थोऽव्यक्तमूलप्रभवःक्षेत्रसंज्ञकःसर्वप्रा

द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते॥

णिकर्मफलाश्रयस्तंपरिष्वक्तौसुपर्णाविवाविद्याकामकर्मवासनाश्रयलिंगोपाध्यात्मेश्वरौ॥तयोःपरिष्वक्तयोरन्यएकःक्षेत्रज्ञोलिं
गोपाधिवृक्षमाश्रितःपिप्पलंफलंकर्मनिष्पन्नंसुखदुःखलक्षणंफलंस्वाद्वनेकविचित्रवेदनास्वादरूपंस्वाद्वत्तिभक्षयत्युपभुंक्तेऽवि
वेकतः॥अनश्नन्नन्यइतरईश्वरोनित्यशुद्धबुद्धमुक्तस्वभावःसर्वज्ञःसर्वसत्वोपाधिरीश्वरोनाश्नातिप्रेरयिताह्यसावुभयोर्भोज्यभोक्त्रो
र्नित्यसाक्षित्वसत्तामात्रेण॥ अव्यक्तमव्याकृतंमूलमुपादानमन्वयितस्मात्प्रभवतीतितथोक्तंयावद्ज्ञानभावीत्यर्थः॥अविद्याकामकर्मवा राम:
सनानामाश्रयोलिंगमुपाधिर्यस्यात्मनःसजीवःतथोक्तःसचेश्वरश्चतावित्यर्थः॥सत्वंमायाख्यमुपाधिरस्येतिसत्वोपाधिःज्ञानात्मकस्यामलसत्व २०
तेथा

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

राशेरिति ह्युक्तमावरणं विक्षेपश्चेति द्वयमविद्यायाः कार्यं तत्रेश्वरभावाप्रतिपत्तिरनीशावरणं शोचतीति विक्षेपः तदुभयहेतुरनिर्वाच्यमज्ञानं मोह

सत्वनश्नन्नन्योऽभिचाकशीतीति पश्यत्येव केवलं दर्शनमात्रं न हि तस्य प्रेरयितृत्वं राजवत्॥ तत्रैवं सति समाने वृक्षे यथोक्ते शरीरे पुरुषो
भोक्ता जीवोऽविद्याकामकर्मफलरागादिगुरुभाराक्रान्तोऽलाबुरिव सामुद्रे जले निमग्नो निश्चयेन देहात्मभावमापन्नोऽयमेवाहममु
ष्य पुत्रोऽस्य नप्ता कृशः स्थूलो गुणवान्निर्गुणः सुखी दुःखीत्येवं प्रत्ययो नास्त्यन्योऽस्मादिति जायते म्रियते संयुज्यते वियुज्यते च
संबंधिबांधवैस्ततोऽनीशया न कस्यचित्समर्थोहं पुत्रो मम विनष्टो मृता मे भार्या किं मे जीवितेनेत्येवं दीनभावोऽनीशा तया शोचति सं

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥१॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः॥ जु
ष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥२॥ यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं ॥

तप्यते मुह्यमानोऽनेकैरनर्थप्रकारैरविवेकतया चिंतामापद्यमानः॥ स एवं प्रेततिर्यङ्मनुष्यादियोनिष्वाजवंजवीभावमापन्नः क
दाचिदनेकजन्मसु शुद्धधर्मसंचितनिमित्ततः केनचित्परमकारुणिकेन दर्शितयोगमार्गोऽहिंसासत्यब्रह्मचर्यसर्वत्यागशमदमादि
संपन्नः समाहितात्मा सन् जुष्टं सेवितमनेकैर्योगमार्गैः कर्मभिश्च यदा यस्मिन्काले पश्यति ध्यायमानोऽन्यं वृक्षोपाधिलक्षणाद्विलक्षणमी
शमसंसारिणमशनायापिपासाशोकमोहजरामृत्युमतीतमीशं सर्वस्य जगतोऽयमहमस्म्यात्मा सर्वस्य समः सर्वभूतस्थो नेतरो स्तेनवि
शिष्टोऽनेकैरनर्थप्रकारैरहंकरोमीत्यादिभिरविवेकतया तादात्म्यापन्नतयेत्यर्थः॥ आजवमनवरतं जवीभावं निकृष्टभावं लक्षणया स घु

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

भावंकर्मवाग्रप्रेरिततयाजीवभावंसंप्रमापन्नःपूर्ववदित्यभेदेनेत्यर्थः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

ऽविद्याजनितोपाधिपरिच्छिन्नोमायात्मेतिविभूतिंमहिमानंचजगद्रूपमस्यैवममपरमेश्वरस्येतियदेवंद्रष्टातदावीतशोकोभवति
सर्वस्माच्छोकसागराद्विप्रमुच्यतेकृतकृत्योभवतीत्यर्थः॥अन्योपिमंत्रइममेवार्थमाहसविस्तरं॥यदायस्मिन्कालेपश्यःपश्यती
तिविद्वान्साधकइत्यर्थः॥पश्यतेपश्यतिपूर्ववद्रुक्मवर्णंस्वयंज्योतिःस्वभावंरुक्मस्येवज्योतिरस्याविनाशि॥कर्तारंसर्वस्यजगतईं
शंपुरुषंब्रह्मयोनिंब्रह्मचतद्योनिश्चासौब्रह्मयोनिस्तंब्रह्मयोनिंब्रह्मणोवाऽपरस्ययोनिंसयदाचैवंपश्यति॥तदासविद्वान्पश्यःपु
ण्यपापेबंधनभूतेकर्मणीसमूलेविधूयनिरस्यदग्ध्वानिरंजनोनिर्लेपोविगतक्लेशःपरमंप्रकृष्टंनिरतिशयंसाम्यंसमतामद्वयलक्षणांद्वै

तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैति ३॥प्राणोह्येषसर्वभूतैर्विभातिविजानन्विद्वान्भवतेनातिवादी॥

तविषयाणिसाम्यान्यतोऽर्वाञ्च्येवातोऽद्वयलक्षणमेतत्परमंसाम्यमुपैतिप्रतिपद्यते॥किंच॥योयंप्राणस्यप्राणःपरईश्वरोह्येषप्रकृतःस
र्वैर्भूतैर्ब्रह्मादिस्तंबपर्यंतैरित्थंभूतलक्षणेतृतीया॥सर्वभूतस्थःसर्वात्मासन्नित्यर्थः॥विभातिविविधंदीप्यतेएवंसर्वभूतस्थंयःसाक्षादा
त्मभावेनायमहमस्मीतिविजानन्विद्वान्वाक्यार्थज्ञानमात्रेणसभवतेभवतिनभवतीत्येतत्किमतिवादीअतीत्यसर्वानन्यान्वदितुंशील
मस्येत्यतिवादीयस्त्वेवंसाक्षादात्मानंप्राणस्यप्राणंविद्वानतिवादीसनभवतीत्यर्थः॥सर्वंयदात्मैवनान्यदस्तीतिदृष्टंतदाकिंह्यसावतीत्य
वदेद्यस्त्वपरमन्यद्दृष्टमस्तिसतदतीत्यवदत्ययंतुविद्वानात्मनोन्यन्नपश्यतिनान्यच्छृणोतिनान्यद्विजानातिअतोनातिवदति ॥ ॥

आत्मनि रतिरात्मरतिस्तत्पुरुषः सैव क्रियास्यास्यात्मरतिक्रियावानिति मतुबेवैकः प्रतीयते॥ कथमुक्तं बहुव्रीहिमतुबर्थयोरन्यतरोतिरिच्य
त इति सत्यमसमासपाठे द्वयोरर्थवत्त्वमासीत् समासपाठे त्वन्यतरो मतुब तिरिच्यते विशेष्यते बाह्यक्रियानिवृत्तिलाभादित्यर्थः॥ एकदेशिव्याख्या

किंच आत्मक्रीड आत्मन्येव च क्रीडा क्रीडनं यस्य नान्यत्र पुत्रदारादिषु स आत्मक्रीडस्तथा आत्मरतिरात्मन्येव रती रमणं प्रीतिर्यस्य स आ
त्मरतिः॥ क्रीडा बाह्यसाधनसापेक्षा रतिस्तु निरपेक्षा बाह्यविषयप्रीतिमात्रमिति विशेषः॥ तथा क्रियावान् ज्ञानध्यानवैराग्यादिक्रियाय
स्य सोयं क्रियावान्॥ समासपाठे आत्मरतिरेव क्रियाऽस्य विद्यत इति बहुव्रीहिमतुबर्थयोरन्यतरोतिरिच्यते॥ केचित्त्वग्निहोत्रादिकर्मब्रह्म
विद्ययोः समुच्चयार्थमिच्छंति तच्चैष ब्रह्मविदां वरिष्ठ इत्यनेन मुख्यार्थवचनेन विरुध्यते॥ न हि बाह्यक्रीड आत्मरतिश्च भवितुं शक्तः॥ क्वचि

आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ४॥

द्बाह्यक्रियाविनिवृत्त आत्मक्रीडो भवति बाह्यक्रियात्मक्रीडयोर्विरोधान्न हि तमःप्रकाशयोर्युगपदेकत्र स्थितिः संभवति॥ तस्मादसत्प्रल
पितमेवैतदनेन ज्ञानकर्मसमुच्चयप्रतिपादनं॥ अन्या वाचो विमुंचथ॥ संन्यासयोगादित्यादिश्रुतिभ्यश्च॥ तस्मादयमेवेह क्रियावान्यो ज्ञान
ध्यानादिक्रियावान्सोऽभिन्नार्थमर्यादः संन्यासी य एवंलक्षणो नातिवाद्यात्मक्रीड आत्मरतिः क्रियावान् ब्रह्मनिष्ठः सर्वब्रह्मविदां सर्वेषां व
रिष्ठः प्रधानः॥ अधुना सत्यादीनि भिक्षोः सम्यक्ज्ञानसहकारीणि साधनानि विधीयंते निवृत्तिप्रधानानि सत्येनानृतत्यागेन मृषावदनत्या
गेन लभ्यः प्राप्तव्यः किंच॥ मुद्राग्यनिराचष्टे॥ केचित्त्वित्यादिना॥ अनेन वचनेन ज्ञानकर्मसमुच्चयप्रतिपादनं क्रियत इत्येतदसत्प्रलपितमेवेति यो

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

शब्देनवस्तुविष अवगतिफलावसानंवाक्यार्थज्ञानमुच्यतेअवगतिफलस्यस्वकार्येअविद्यानिवृत्तौसहकार्यपेक्षाऽसंभवात्ततोऽपरिपक्वज्ञान स्यसत्यादीनांचपरिपक्वविद्यालाभायसमुच्चयइष्यतएवनैतावताभास्कराभिमतसिद्धिः॥परिपक्वविद्यायाःसहकार्यपेक्षायांमानाभावात्ततःक

तपसाहिइंद्रियमनएकाग्रतयामनसश्चेंद्रियाणांचैकाग्र्यंपरंतपइतिस्मरणात्॥तद्ध्यनुकूलमात्मदर्शनाभिमुखीभावात्परमंसाधनं तपःनेतरच्चांद्रायणादिएषआत्मालभ्यइत्यनुषंगःसर्वत्र॥सम्यक्ज्ञानेनयथाभूतात्मदर्शनेनब्रह्मचर्येणमैथुनासमाचारेणनित्यंसर्व दानित्यंसत्येननित्यंतपसानित्यंसम्यक्ज्ञानेनेतिसर्वत्रनित्यशब्दोंतर्दीपिकान्यायेनानुषक्तव्यः॥वक्ष्यतिच॥नयेषुजिह्ममनृतंनमा याचेति॥कोसावात्माएतैःसाधनैर्लभ्यइत्युच्यते॥अंतःशरीरेअंतर्मध्येशरीरस्यपुंडरीकाकाशेज्योतिर्मयोहिरुक्मवर्णःशुभ्रःशुद्धोय

सत्येनलभ्यस्तपसाह्येषआत्मासम्यक्ज्ञानेनब्रह्मचर्येणनित्यं॥अंतःशरीरेज्योतिर्मयोहिशुभ्रोयंपश्यंतियतयःक्षीणदोषाः॥५

मात्मानंपश्यंत्युपलभंतेयतयोयतनशीलाःसंन्यासिनःक्षीणदोषाःक्षीणक्रोधादिचित्तमलाःसआत्मानित्यंसत्यादिसाधनैःसंन्यासिभिर्लभ्यतइ त्यर्थोनकादाचित्कैःसत्यादिभिर्लभ्यतेसत्यादिसाधनस्तुत्यर्थोयमर्थवादः॥सत्यमेवसत्यवानेवजयतिनानृतंनानृतवादीत्यर्थः॥नहिसत्यानृत योःकेवलयोःपुरुषानाश्रितयोःजयःपराजयोवासंभवति॥प्रसिद्धंलोकेसत्यवादिनाऽनृतवाद्यभिभूयतेनविपर्ययोऽतःसिद्धंलोकेसत्यस्यबलवत्सा धनत्वं॥किंचशास्त्रतोप्यवगम्यतेसत्यस्यसाधनातिशयत्वंकथंसत्येनयथाभूतवादव्यवस्थयापंथादेवयानाख्योविततोविस्तीर्णः मांसंश्लेषश्रवणात्देवा

दीनांकर्महीनानांमुक्तिश्रवणाच्चेति॥कुहकंपरवंचनमंतरन्यथागृहीत्वाबहिरन्यथाप्रकाशनंमायाशाठ्यंविभवानुसारेणाप्रदानंअहंकारोमिथ्याभिमानः॥दंभोध

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

एतैर्दोषैर्वर्जिता इत्यर्थः स सत्यस्य निधानं यदुक्तं तत्पुनर्विरोप्यत इत्याह॥ किं धर्मकं च तदिति॥ ज्ञानप्रसादेनेत्यत्र ज्ञायते अर्थोनेनेति व्युत्पत्त्या बुद्धिरु
सा तत्सेन प्रवृत्तो येन पथा ह्याक्रमंत्याक्रमंते ऋषयो दर्शनवंतः कुहकमायाशाठ्याहंकारदंभानृतवर्जिता ह्याप्तकामा विगततृष्णाः सर्वतो य
त्र यस्मिन् तत्परमार्थतत्त्वं सत्यस्योत्तमसाधनस्य संबंधिसाध्यं परमं प्रकृष्टं निधानं पुरुषार्थरूपेण निधीयत इति निधानं वर्ततेतत्र च येन
पथाऽऽक्रमंति स सत्येन वितत इति पूर्वेण संबंधः॥ किं तत् किं धर्मकं च तदित्युच्यते॥ बृहन्महच्च तत्प्रकृतं ब्रह्मसत्यादिसाधनं सर्वतो व्याप्त
त्वाद्दिव्यं स्वयंप्रभमनिंद्रियगोचरमत एव न चिंतयितुं शक्यतेऽस्य रूपमचिंत्यरूपं सूक्ष्मादाकाशादेरपि तत्सूक्ष्मतरं निरतिशयं हि सौक्ष्म्य
सत्यमेव जयति नानृतं सत्येन पंथा विततो देवयानः॥ येनाक्रमंत्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानं॥ ६ बृहच्च
तद्दिव्यमचिंत्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति॥ दूरात्सुदूरे तदिहांतिके च पश्यत्स्विहैव निहितं गुहायां॥ न चक्षुषा गृ
ह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा॥ मस्य सर्वकारणत्वाद्धि भाति विविधमादित्यचंद्राद्याकारेण भाति दीप्यते॥ किंच॥ दूरा
द्धि प्रकृष्टदेशात्सुदूरे विप्रकृष्टतरे देशे वर्तते ऽविदुषामत्यंताऽगम्यत्वात्तद्ब्रह्मेह देहेऽतिके समीपे च विदुषामात्मत्वात्सर्वांतरत्वाच्च आकाशस्या
प्यंतरश्रुतेरिह पश्यत्सु चेतनावत्स्वित्येतत् निहितं स्थितं दर्शनादिक्रियावत्त्वेन योगिभिर्लक्ष्यमाणं क्व गुहायां बुद्धिलक्षणायां तत्र हि निगूढं
लक्ष्यते विद्वद्भिस्तथाप्यविद्यया संवृतं सन्न लक्ष्यते तत्रस्थमेवाविद्वद्भिः॥ पुनरप्यसाधारणं तदुपलब्धिसाधनमुच्यते॥ यस्मान्न चक्षुषा गृह्यते
केनचिदप्यरूपत्वान्नापि गृह्यते वाचाऽनभिधेयत्वान्न चान्यैर्देवैरितरेंद्रियैस्तपसः च्यते ध्यायमानो ज्ञानप्रसादं लभते ज्ञानप्रसादेन आत्मानं पश्य

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं·भा· २३ संशयादिमलरहितस्य प्रमाणज्ञानस्यैव तत्त्वसाक्षात्कारहेतुत्वात् ध्यानक्रियायाः प्रमितिसाधनत्वाप्रसिद्धेरित्यर्थः॥ बौद्धादेश्चित्तादौ चेतनत्वभ्रम टी·

सर्वप्राप्तिसाधनत्वेपि न तपसा गृह्यते तथा वैदिकेनाग्निहोत्रादिकर्मणा प्रसिद्धमहत्वेनापि न गृह्यते॥ किं पुनस्तस्य ग्रहणे साधनमित्या
ह ज्ञानप्रसादेन आत्मावबोधनसमर्थमपि स्वभावेन सर्वप्राणिनां ज्ञानं बाह्यविषयरागादिदोषकलुषितमप्रसन्नमशुद्धं सन्न बोधयति नि
त्यसन्निहितमपि आत्मतत्त्वं॥ मलावनद्धमिवादर्शं विलुलितमिव सलिलं तद्यदेंद्रियविषयसंसर्गजनितरागादिमलकालुष्यापनयनादा
दर्शसलिलादिवत्प्रसादितं स्वच्छं शांतमवतिष्ठते तदा ज्ञानस्य प्रसादः स्यात्तेन ज्ञानप्रसादेन विशुद्धसत्त्वो विशुद्धांतःकरणो योग्यो ब्रह्म द्रष्टुं

ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः॥८॥ एषोणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पंच
धा संविवेश॥ प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येष आत्मा॥९॥ यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः का
मयते यांश्च कामान्॥ यस्मात्ततस्तस्मात्तु तमात्मानं पश्यते पश्यति उपलभते॥ निष्कलं सर्वावयवभेदवर्जितं ध्यायमानः॥ सत्यादिसा
धनवानुपसंहृतकरण एकाग्रेण मनसा ध्यायमानश्चिंतयन्॥ यमात्मानमेवं पश्यत्येषोणुः सूक्ष्मः चेतसा विशुद्धज्ञानेन केवलेन वेदितव्यः॥
क्वासौ यस्मिन् शरीरे प्राणो वायुः पंचधा प्राणापानादिभेदेन संविवेश सम्यक्प्रविष्टः॥ तस्मिन्नेव शरीरे हृदये चेतसा ज्ञेय इत्यर्थः॥ कीदृशेन चे
तसा वेदितव्य इत्याह॥ प्राणैः सहेंद्रियैश्चित्तं सर्वमंतःकरणं प्रजानामोतं व्याप्तं येन क्षीरमिव स्नेहेन काष्ठमिवाग्निना सर्वं प्रजानामंतःकरणं चेत रामः

दर्शनात् चित्तं स्वस्मिन् संसर्गिणि च चैतन्याभिव्यंजकत्वे स्वभावतस्त्वयोग्यं॥ ततश्चित्ते परमात्मनोभिव्यक्तिसंभवाच्चेतसा ज्ञेयत्वमुच्यत इति संभावनार्थमाह॥ २३

ओतंचैतन्येनसर्वेस्यतर्हिचित्तेकिमितिब्रह्मस्वतएवापरोक्षंनभवतीत्यतआह॥यस्मिंश्चित्तइतिसगुणविद्याफलमितिनिर्गुणविद्यास्तुतयेप्ररो

यस्मिंश्चचित्तेक्लेशादिमलवियुक्तेशुद्धेविभवत्येषउक्तआत्माविशेषेणस्वेनात्मनाविभवत्यात्मानंप्रकाशयतीत्यर्थः॥यएवमुक्तलक्षणंसर्वा
त्मानमात्मत्वेनप्रतिपन्नस्तस्यसर्वात्मत्वादेवसर्वावाप्तिलक्षणंफलमाह॥यंयंलोकंपित्रादिलक्षणंमनसासंविभातिसंकल्पयतिमह्यमन्यस्मैवा
भवेदितिविशुद्धसत्वःक्षीणक्लेशआत्मविन्निर्मलांतःकरणःकामयतेयांश्चकामान्प्रार्थयतेभोगांस्तंतंलोकंजयतेप्राप्नोतितांश्चकामान्संक
ल्पितान्भोगांस्तस्माद्विदुषःसत्यसंकल्पत्वादात्मज्ञंआत्मज्ञानेनविशुद्धांतःकरणंह्यर्चयेत्पूजयेत्पादप्रक्षालनशुश्रूषणनमस्कारादिभिर्भूति

तंतंलोकंजयतेतांश्चकामांस्तस्मादात्मज्ञंह्यर्चयेद्भूतिकामः॥११॥सवेदैतत्परमंब्रह्मधामयत्रविश्वंनिहितंभातिशुभ्रं॥उ
पासतेपुरुषंयेह्यकामास्तेशुक्रमेतदतिवर्ततिधीराः॥१॥ कामोविभूतिमिच्छुतःपूजार्हएवासौ॥यस्मात्सवेदजानातीत्येतद्यथोक्तलक्ष

णंब्रह्मपरममुत्कृष्टंधामसर्वकामानामाश्रयमास्पदंयत्रयस्मिन्ब्रह्मणिधाम्निविश्वंसमस्तंजगन्निहितमर्पितंयच्चस्वेनज्योतिषाभातिशु
द्धंशुभ्रं॥तमप्येवमात्मज्ञंपुरुषंयेह्यकामाविभूतितृष्णावर्जितामुमुक्षवःसंतउपासतेपरमिवसेवंते॥शुक्रंनृबीजंयदेतत्प्रसिद्धंशरीरोपा
दानकारणमतिवर्ततिअतिगच्छंतिधीराधीमंतोनपुनर्योनिंप्रसर्पंति॥नपुनःक्वचिद्रतिंकरोतीतिश्रुतेः॥अतस्तंपूजयेदित्यभिप्रायः॥मुमुक्षोः
कामत्यागएवप्रधानंसाधनमित्येतद्दर्शयति॥कामान्योदृष्टादृष्टविषयान्कामयतेमन्यमानस्तद्गुणान्चिंतयानःप्रार्थयते॥ चनार्थमुच्यते॥यंयमिति॥प्र

थमःखंडः॥परमार्थतत्वज्ञानादिति॥विषयेषुयथास्थितदोषदर्शनात्पर्याप्तकामःक्षीणरागोविरुद्धलक्षणयाआत्मकामस्यआत्मबुभुत्सयैववशीकृतचित्तस्यविष

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

स्वहेतुविनाशात्पुनःकामानजायंतइतिजातानांज्ञानंविनापिस्थ्यासंभवादित्यर्थः॥नबहुनाश्रुतेनेत्युपनिषद्विचारव्यतिरिक्तेनेत्यर्थः॥तेनवरणेनेति॥क
थंव्याख्यातंयत्तदोर्भिन्नार्थत्वंसाधनविवक्षायाःप्रस्तुतत्वादित्यर्थंब्रूमःपरमात्मास्मीत्यभेदानुसंधानंवरणंतेनवरणेनैषआत्मालभ्योभवतिबहिर्मुखेनतु

सतैःकामभिःकामैर्धर्माधर्मप्रवृत्तिहेतुभिर्विषयेच्छारूपैःसहजायतेतत्रतत्रयत्रयत्रविषयप्राप्तिनिमित्तंकामाःकर्मसुपुरुषंनियोजयंतितत्रत
त्रतेषुतेष्वविषयेषुतैरेवकामैर्वेष्टितोजायते॥यस्तुपरमार्थतत्त्वविज्ञानात्पर्याप्तकामआत्मकामत्वेनपरिसमंततआप्ताःकामायस्यतस्यपर्याप्तका
मस्यकृतात्मनोऽविद्यालक्षणादपररूपादपनीयस्वेनरूपेणकृतआत्माविद्ययायस्यतस्यकृतात्मनस्त्विहैवतिष्ठत्येवशरीरेसर्वेधर्माधर्मप्रवृत्ति
हेतवःप्रविलीयंतिविलयमुपयांतिनश्यंतीत्यर्थः॥कामास्तज्जन्महेतुविनाशान्नजायंतइत्यभिप्रायः॥यद्येवंसर्वलाभात्परमआत्मलाभस्तस्मा

कामान्यःकामयतेमन्यमानःसकामभिर्जायतेतत्रतत्र॥पर्याप्तकामस्यकृतात्मनस्त्विहैवसर्वेप्रविलीयंतिकामाः॥२॥नायमा
त्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन॥यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूंस्वां॥३॥भायप्रवचनादयउपा

याःबाहुल्येनकर्तव्याइतिप्राप्तइदमुच्यते॥योयमात्माव्याख्यातोयस्यलाभःपरपुरुषार्थोनासौवेदशास्त्राध्ययनबाहुल्येनप्रवचनेनलभ्यस्त
थानमेधयाग्रंथार्थधारणशक्त्यानबहुनाश्रुतेननापिभूयसाश्रवणेनेत्यर्थः॥केनतर्हिलभ्यइत्युच्यते॥यमेवपरमात्मानमेवैषविद्वान्वृणुते
प्राप्तुमिच्छतितेनवरणेनैषपरमात्मालभ्यः॥नान्येनसाधनांतरेणनित्यलब्धस्वभावत्वात्॥कीदृशोविदुषआत्मलाभइत्युच्यते॥
शतशोपिश्रवणादौक्रियमाणेनलभ्यतेऽतःपरमात्मास्मीत्यभेदानुसंधानंपरमात्मभजनंपुरस्कृत्यैवश्रवणादिसंपादनीयमितिभावः॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

अथवायमेव परमात्मानं वृणुते तेन परमात्मना मुमुक्षुरूपव्यवस्थितेन वरणेनाभेदानुसंधानलक्षणेन प्रार्थनेन कृता लभ्यः परमात्मैव मुमुक्षुरूपव्यवस्थित इत्यभेदानुसंधानेनैव लभ्यो न कर्मणेत्यर्थः॥ वीर्यमिति मिथ्याज्ञानानभिभाव्यतालक्षणातिशयः॥ अलिंगादिति॥ कथमिंद्र जनक तस्यैष आत्मा अविद्यासंछिन्नां स्वां परं तत्त्वं स्वात्मतत्त्वं स्वरूपं विवृणुते प्रकाशयति॥ प्रकाशदृव घटादि विद्यायां सत्यामाविर्भवतीत्यर्थः॥ तस्मादन्यत्यागेनात्मलाभप्रार्थनेवात्मलाभसाधनमित्यर्थः॥ आत्मप्रार्थनासहायभूतान्येतानि च साधनानि बलाप्रमादतपांसि लिंगयुक्तानि संन्याससहितानि॥ यस्मादयमात्मा बलहीनेन बलप्रहीणेनात्मनिष्ठाजनितवीर्यहीनेन न लभ्यो नापि लौकिकपुत्रपश्वादिविषयसंगनिमित्तप्रमादात्तथा तपसो वाप्यलिंगाल्लिंगरहिताच्च पोऽत्र ज्ञानं लिंगं संन्यासः॥ संन्यासरहितात्तज्ज्ञानान्न लभ्यत इत्यर्थः॥ एते

नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिंगात्॥ एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम॥ संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीतरागाः प्रशांताः॥

रुपायैर्बलाप्रमादसंन्यासज्ञानैर्यतते तत्परः सन्प्रयतते यस्तु विद्वान्विवेकी आत्मवित्तस्य विदुष एष आत्मा विशते संप्रविशति ब्रह्मधाम॥ कथं ब्रह्म संविशत इत्युच्यते॥ संप्राप्य समवगम्यैनमात्मानमृषयो दर्शनवंतस्तेनैव ज्ञानेन तृप्ता न बाह्येन तृप्तिसाधनेन शरीरोपचयकारणेन कृतात्मानः परमात्मस्वरूपेणैव निष्पन्नात्मानः संतो वीतरागा विगतरागादिदोषाः प्रशांता उपरतेंद्रियास्त एवंभूताः सर्वगं सर्वव्यापिनमाकाशवत्सर्वतः

गार्गिप्रभृतीनामप्यात्मलाभश्रवणात्स्वसंन्यासो नाम सर्वत्यागात्मकस्तेषामपि स्वत्वाभिमानाभावादस्त्येवांतरः संन्यासो बाह्यं तु लिंगमविवक्षितं॥ न लिंगं धर्मकारणमिति स्मरणात्तन्नैष्कर्म्यसाहित्यं

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं॰भा॰ प्रदीपस्य वर्तिकृतावच्छेदध्वंसे यथा तेजः सामान्यतापत्तिस्तद्वदित्याह॥ प्रदीपनिर्वाणवदिति॥ परं पादन्यासप्रतिबिंबं न दृश्यते ऽभावादेवेत्यर्थः॥ टी॰
२५
सर्वत्र प्राप्य नोपाधिपरिच्छिन्नेनैकदेशेन किं तर्हि तद्ब्रह्मैवाद्वयमात्मत्वेन प्रतिपद्य धीरा असंतविवेकिनः युक्तात्मानः नित्यसमाहित
स्वभावाः सर्वमेव समस्तं शरीरपातकाले प्याविशंति॥ भिन्ने घटे घटाकाशवदविद्याकृतोपाधिपरिच्छेदं जहति एवं ब्रह्मविदो ब्रह्मधाम
प्रविशंति॥ किंच॥ वेदांतजनितं विज्ञानं तस्यार्थः पर आत्मा विज्ञेयः सोर्थः सुनिश्चितो येषां ते वेदांतविज्ञानसुनिश्चितार्थाः॥ ते च संन्या
सयोगात्सर्वकर्मपरित्यागलक्षणयोगात्केवलब्रह्मनिष्ठास्वरूपाद्योगाद्यतयो यतनशीलाः शुद्धसत्वाः शुद्धं सत्वमेषां ते संन्यासयो
गात्शुद्धसत्वाः॥ ते ब्रह्मलोकेषु संसारिणां ये मरणकालास्ते परांतकालास्तानपेक्ष्य मुमुक्षूणां संसारावसाने देहपरित्यागकालः परांतकालः

ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशंति॥५॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः
॥ ते ब्रह्मलोकेषु परांतकाले परामृताः परिमुच्यंति सर्वे॥६॥ तस्मिन्परांतकाले साधकानां बहुत्वाद्ब्रह्मैव लोको ब्रह्मलोक एको
प्यनेकवद्दृश्यते प्राप्यते वा ऽतो बहुवचनं ब्रह्मलोकेषु ब्रह्मणीत्यर्थः॥ परामृताः परममृतममरणधर्मकं ब्रह्मात्मभूतं येषां ते परामृता
जीवंत एव ब्रह्मभूताः परामृताः संतः परिमुच्यंति परि समंतात्प्रदीपनिर्वाणवद्घटाकाशवच्च निर्वृत्तिमुपयांति परिमुच्यंति समंतान्मुच्यं
ते सर्वे न देशांतरं गंतव्यमपेक्षंते॥ शकुनीनामिवाकाशे जले वारिचरस्य वा॥ पदं यथा न दृश्येत तथा ज्ञानवतां गतिः॥ अनध्वगा अध्वसु पारयि
ष्णव इति स्मृतिश्रुतिभ्यः देशपरिच्छिन्ना हि गतिः संसारविषये परिच्छिन्नसाधनसाध्यत्वात्॥ अध्वस्विति संसाराध्वनां पारयिष्णवः पारयितुं समापयि
राम॰
२५

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

तर्कतोपि इहैव मोक्षो वक्तव्य इत्याह॥ देशपरिच्छिन्नाहीत्यादिना॥ स्वाः प्रतिष्ठाः प्रतिगता भवंतीति भूतांशानां भौतिकानां च महाभूतेषु लयो दर्शितः॥ अस्य
प्रश्नेति॥ ब्राह्मणग्रंथे षष्ठप्रश्ने प्राणाद्याः कलाः पठिता इत्यर्थः॥ मायामयमहाभूतानामंशावष्टब्धो जीवो विद्यामयभूतसूक्ष्मैः प्रातिस्विकैरदृष्टसहकृ

ब्रह्म तु समस्तत्वान्न देशपरिच्छेदेन गंतव्यं यदि हि देशपरिच्छिन्नं ब्रह्म स्यान्मूर्तद्रव्यवदाद्यंतवदन्याश्रितं सावयवमनित्यं कृतकं स्यान्न त्वेवंवि
धं ब्रह्म भवितुमर्हत्यतस्तत्प्राप्तिश्च नैव देशपरिच्छिन्ना भवितुं युक्ता॥ अपि चाविद्यादिसंसारबंधापनयनमेव मोक्षमिच्छंति ब्रह्मविदो न तु
कार्यभूतं॥ किं च मोक्षकाले या देहारंभिकाः कलाः प्राणाद्याः स्वाः स्वां प्रतिष्ठां गताः स्वं स्वं कारणं गता भवंतीत्यर्थः॥ प्रतिष्ठा इति द्वितीया बहुव
चनं॥ पंचदश पंचदशसंख्याका या अंत्यप्रश्नपरिपठिताः प्रसिद्धा देवाश्च देहाश्रयाश्चक्षुरादिकरणस्थाः सर्वे प्रतिदेवतास्वादित्यादिषु गता भ

गताः कलाः पंचदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु॥ कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवंति॥ ७॥ ७॥

वंतीत्यर्थः॥ यानि च मुमुक्षुणा कृतानि कर्माण्यप्रवृत्तफलानि प्रवृत्तफलानामुपभोगेनैव क्षीयमाणत्वाद्विज्ञानमयश्चात्माऽविद्याकृतबुद्ध्या
द्युपाधिमात्मत्वेन गत्वा जलादिषु सूर्यादिप्रतिबिंबवदिह प्रविष्टो देहभेदेषु कर्मणां तत्फलार्थत्वात्सह तेनैव विज्ञानमयेनात्मना॥ अतो वि
ज्ञानमयो विज्ञानप्रायस्त एते कर्माणि विज्ञानमयश्चात्मोपाध्यपनये सति परेऽव्ययेऽनंतेऽक्षये ब्रह्मण्याकाशकल्पेऽजेऽजरेऽमृतेऽभयेऽपूर्वेऽनपरेऽनंत
रेऽबाह्येऽद्वये शिवे शांते सर्व एकीभवंत्यविशेषतां गच्छंत्येकत्वमापद्यंते॥ जलाद्याधारापनय इव सूर्यादिप्रतिबिंबाः सूर्ये घटाद्यपनय इवाकाशे घ

तैः प्रातिस्विकाः प्राणादय आरभ्यंते ते च कर्माक्षिप्तैर्दैवैः सूर्यादिभिरधिष्ठीयंते॥ कर्मणो भोगेनावसाने ते देवाः स्वस्थानं गच्छंति यच्च प्रातिस्विकं स्वाविद्याकार्यं त

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मुं·भा· एतद्ग्रंथद्वारकविद्याप्रदानेअयंविधिराथर्वणिकानामितिप्रकृतपरामर्शकादेतत्शब्दादवगम्यते॥ग्रंथद्वारेणविद्यायाःप्रकृतत्वसंभवात्॥ श्री·
२६
किंच॥यथानद्योगंगाद्याःस्यंदमानागच्छंत्यःसमुद्रेसमुद्रंप्राप्यास्तमदर्शनमविशेषात्मभावंगच्छंतिप्राप्नुवंतिनामचरूपंचनाम
रूपेविहायहित्वा॥तथाऽविद्याकृतनामरूपाद्विमुक्तःसन्विद्वान्परादक्षरात्पूर्वोक्तात्परंदिव्यंपुरुषंयथोक्तलक्षणमुपैत्युपगच्छ
ति॥ननुश्रेयस्यनेकेविघ्नाःप्रसिद्धाअतःक्लेशानामन्यतमेनान्येनवादेवादिनाविघ्नितोब्रह्मविदप्यन्यांगतिंमृतोगच्छतिनब्रह्मैव॥न
विद्ययैवसर्वप्रतिबंधस्यापनीतत्वादविद्याप्रतिबंधमात्रोहिमोक्षोनान्यःप्रतिबंधोनित्यत्वादात्मभूतत्वाच्च॥तस्मात्सयःकश्चिद्धवैलो
केतत्परमंब्रह्मवेदसाक्षादहमेवास्मीतिसनान्यांगतिंगच्छतिदेवैरपितस्यब्रह्मप्राप्तिंप्रतिविघ्नोनशक्यतेकर्तुमात्माह्येषांसभवति

यथानद्यःस्यंदमानाःसमुद्रेऽस्तंगच्छंतिनामरूपेविहाय॥तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यं॥ ८
सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवतिनास्याब्रह्मवित्कुलेभवति॥तरतिशोकंतरतिपाप्मानंगुहाग्रंथिभ्योविमुक्तोऽमृ
तोभवति॥तदेतदृचाभ्युक्तं॥ तस्माद्ब्रह्मविद्वान्ब्रह्मैवभवति॥किंच॥नास्यविदुषोऽब्रह्मवित्कुलेभवति॥किंच॥तरतिशोकमने
केष्टवैकल्यनिमित्तंमानससंतापंजीवन्नेवातिक्रांतोभवतितरतिपाप्मानंधर्माधर्माख्यंगुहाग्रंथिभ्योहृदयाविद्याग्रंथिभ्योविमुक्तःस
२ न्नमृतोभवतीत्युक्तमेवभिद्यतेहृदयग्रंथिरित्यादि॥अथेदानींब्रह्मविद्यासंप्रदानविध्युपप्रदर्शनेनोपसंहारःक्रियते॥तदेतद्विद्यासंप्रदान राम·
विधानमृचामंत्रेणाभ्युक्तंप्रकाशितं॥क्रियावंतोयथोक्तकर्मानुष्ठानयुक्ताःश्रोत्रियाब्रह्मनिष्ठाअपरस्मिन्ब्रह्मण्यभियुक्ताःपरंब्रह्मबुभुत्सवः २६

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

मु॰उ॰ २५

नसर्वत्रब्रह्मविद्यासंप्रदानमितिसूचयन्नाह॥ एतांब्रह्मविद्यांवदेतेति॥ इतिमुंडकभाष्यटिप्पणंसमाप्तम् ॥ ७ ॥ ७ ॥ ७ ॥

स्वयमेकर्षिनामानमग्निंजुह्वतेजुह्वतिश्रद्धयंतः श्रद्दधानाः संतोयेतेषामेवसंस्कृतात्मनांपात्रभूतानामेतांब्रह्मविद्यांवदेतब्रूया
च्छिरोव्रतंशिरस्यग्निधारणलक्षणंयथाथर्वणानांवेदव्रतंप्रसिद्धंयैस्तुयैश्चचीर्णंविधिवद्यथाविधानंतेषामेवतदेतदक्षरंपुरुषंसत्य
मृषिरंगिरानामपुरापूर्वंशौनकायविधिवदुपसन्नायपृष्टवतेउवाच॥ तद्वदन्योपितथैवश्रेयोर्थिनेमुमुक्षवेमोक्षार्थंविधिवदुपसन्नायब्रू

क्रियावंतः श्रोत्रियाब्रह्मनिष्ठाःस्वयंजुह्वतएकऋषिंश्रद्धयंतः॥ तेषामेवैतांब्रह्मविद्यांवदेतशिरोव्रतंविधिवद्यैस्तुचीर्णं १०
॥ तदेतत्सत्यमृषिरंगिराःपुरोवाचनैतदचीर्णव्रतोधीते॥ नमः परमऋषिभ्योनमः परमऋषिभ्यः ११ ॥ ६ ॥ इतितृतीयमुंड
कं॥ भद्रंक र्णेभिरितिशांतिः॥ इत्यथर्ववेदीयामुंडकोपनिषत्समाप्ता ॥ यादित्यर्थः॥ नैतद्ग्रंथरूपमचीर्णव्रतोऽचरितव्रतःना
प्यधीतेनपठतिचीर्णव्रतस्यहिविद्याफलायसंस्कृताभवतीतिसमाप्ताब्रह्मविद्यासायेभ्योब्रह्मादिभ्यःपारंपर्यक्रमेणसंप्राप्तातेभ्योनमः
परमर्षिभ्यःपरंब्रह्मसाक्षाद्दृष्टवंतोयेब्रह्मादयोऽवगतवंतश्चतेपरमर्षयस्तेभ्योभूयोपिनमः द्विर्वचनमत्यादरार्थंमुंडकसमाप्त्यर्थंच॥ ॥ इति
श्रीगोविंदभगवत्पूज्यपादशिष्यस्यपरमहंसपरिव्राजकाचार्यस्यश्रीमच्छंकरभगवतःकृतावाथर्वणोपनिषद्विवरणंसमाप्तं ॥ ७ ॥

वाराणसीप्रसादस्यनियोगेनतुयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥ १॥ श्रीकाशीजीमेमहल्लेहौदकटोराश्रीबाबूवाराणसीप्रसादजीकेमकानमेकाशीसं २६
स्कृतमुद्रायंत्रमेछपीजिनकोलेनाहोयउनकोश्रीबाबूवाराणसीप्रसादजीकेपासयाकचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगी संवत् १९४२ ॥ ७ ॥ ७

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri

॥ इतिसटीकंमुंडकोपनिषद्भाष्यंसमाप्तम् ॥

CC-0. Mumukshu Bhavan Collection. Digitized by eGangotri